॥ ॥ रक्षमात्रे घृताढके ॥ ५ ॥ सितापलानि पूते च सीते द्वात्रिंशदापयेत् ॥ गोधूमपिप्पलीवासी चूर्णं शृंगा ॥ ८०
टकस्य च ॥ ६ ॥ समाक्षिकं कोडविकं तत्सर्वं खजमंथितं ॥ स्थानं सर्प्पिर्गुडान्कृत्वा भूर्जपत्रेण वेष्टयेत्
॥ ७ ॥ तान्जग्ध्वा पलिकान्क्षीरं मद्यं चानुपिबेत्कफे ॥ शोषकासक्षतक्षीणे श्रम भारकर्शिते ॥ ८ ॥ रक्त
निष्ठीवने तारं पीनसारोचके तथा ॥ हीनाग्नि शिरःशूले भेदे च स्वरवर्णयोः ॥ ९ ॥ सर्प्पिर्गुडः ॥ ॥

बिल्वाग्निमंथश्योनाकः काश्मर्यपाटलाबला॥ पर्ण्यश्चतस्रः पिप्पल्यःश्वदंष्ट्राबृहतीद्वयं॥२४॥ शृंगीतामा
मलकीद्राक्षाजीवंतीपुष्करागरुः॥ अभयाचामृताऋद्धीजीवकर्षभकौसठी॥२५॥ मुस्तापुनर्नवामेदासू
क्ष्मैलोत्पलचंदने॥ विदारीवृषमूलानिकाकोलीकाकनासिका॥२६॥ एषांपलोन्मितान्भागान्शतान्या
मलकस्यच॥ पंचधांत्तदैकस्थंजलद्रोणेविपाचयेत्॥२७॥ ज्ञात्वागतरसंगव्यंस्संगृहीतगालितं॥ मे
मंथामलकमुद्धृत्यनिःकुलंतैलसर्पिषोः॥२८॥ पलद्वादशकेभृष्ट्वादत्वाचार्द्धतुलांभिषक्॥ मत्स्यंडिका
याःपूतायाःलेहवत्साधुसाधयेत्॥२९॥ षट्पलंमधुनश्चात्रसिद्धशीतेप्रदापयेत्॥ चतुंगाक्षीर्याः
पिप्पलाद्विपलंतथा॥३०॥ पलमेकंनिदध्याच्चत्वगेलापत्रकेसरात्॥ इत्ययंच्यवनप्राशःपरमुक्तोर
सायनः॥३१॥ कासश्वासहरश्चैवविशेषेणोपदिश्यते॥ क्षीणक्षतानांवृद्धानांबालानांचांगवर्द्धनं
॥३२॥ स्वरक्षयमुरोरोगंवातशोणितं॥ पिपासामूत्रशुक्रस्थान्दोषांश्चाप्यपकर्षति॥३३॥ अस्यमात्रा
प्रयुंजानोयथारुच्यग्निभोजनं॥ अस्यप्रयोगाच्च्यवनःसुवृद्धोभूत्पुनर्नवः॥३४॥ मेधांस्मृतिकांती
मनामयंचमायुःप्रकर्षंबलमिंद्रियाणां॥ स्त्रीषुप्रहर्षंपरमाग्निवृद्धिंवर्णप्रसादंपवनानुलोम्यं॥

हृद्रोगं २

दद्या

पलंतु

कौ ५

पं ३

रसायनस्यास्य नरः प्रयोगाल्लभेत जीर्णोऽपि कुटीप्रवेशात्॥ क्षतक्षयं सर्वमयास्य रूपं बिभर्त्ति पिंनवयौवनानां॥ ७४॥ केचिदिच्छंति मत्स्यंड्याः स्थानेतु सितशर्करां॥ मद्दः कल्कः सरूसाक्रोद्रष्टधात्र्यांप्रशस्यते॥ ७५॥ च्यवनप्राशः॥ ॥ द्विपंचमूलीस्वयंगुप्तांशंखपुष्पी सठी बला॥ हस्तिपिप्पल्यपामार्गपीप्पलीमूलचीत्रकान्॥ ७६॥ भार्गीपुष्करमूलंच द्विपलांशान् यवाढकान्॥ हरीतकीशतं चैकं जलद्रोणे विपाचयेत्॥ ७७॥ तेलात्सपिप्पलीर्णां सिद्ध सिते च माक्षिकान्॥ लेहयेन् द्वेभयेनिस्यमतः स्वादेद्रसायनात्॥ ७८॥ यच्चश्लैत्रे कषायं तु पूतेनद्या नयाशतो॥ पचेद्गुड तुलां दत्वा कुडवं च पृथक् धृतं॥ ७९॥ तद्वलीपलितं हंन्याद्वर्णायुर्बलवर्द्धनं॥ पंचकासान् क्षयंश्वासं हिक्कासविषमज्वरान्॥ ८०॥ हन्यात्तथाग्रहण्यर्शोहृद्रोगारुचिपीनसान्॥ अगस्तिविहितं पुण्यमिदं श्रेष्टं रसायनं॥ ८१॥ यथोद्दिष्टगुणं कुर्वन् पितं च कुरुते पदि॥ तदावायं गुडोयोज्य एष एवाल्पमात्रया॥ ८२॥ संख्यापलानां शतशोपलास्यात्॥ ॥ अगस्त्यहरीतकीनाम॥ ॥ पिप्पलीगुडसंसिद्धं छागक्षीरघृतं युतं॥ ८३॥ एतदग्निर्विवर्द्धं थं सर्पिश्च क्षयकाशिनां॥ पिप्पलीपिप्पलीमूलंचव्यचित्रकनागरे॥ ८४॥ सायावश्लकेसः क्षीरेश्रो

२५ १५८॥ १५०॥ बि २

तः संशोधनं घृतं ॥ कल्कोत्र पादिकः कार्यः क्षीरं चापि चतुर्गुणं ॥ ४९ ॥ षडंगघृतं ॥ ॥ बलाश्वदंष्ट्राबृहतीक
लसीधावनीस्थिरा ॥ निंबपर्प्पटकं मुस्तं त्रायमाणं दुरालभां ॥ ५० ॥ भागान् पलोन्मितान् कृत्वा पचेदष्ट
गुणे जले ॥ कर्षमात्रान् ततो कल्कं दद्यादामलकीं सटी ॥ ४९ ॥ द्राक्षापुष्करमूलं च मेदामामलकानि च ॥ तैः
साधयेद् घृतप्रस्थं क्षीरं द्विगुणितं भिषक् ॥ ५० ॥ एतत्सिद्धं बलाद्यं च सर्पिर्ज्वरहरं परं ॥ क्षयकासप्रशम
नं शिरःपार्श्वरुजापहं ॥ ५१ ॥ चंदनांबुनखं वा[illegible]शैलेयपद्मकं ॥ मंजिष्टासरलं दारु चव्यैलाश्रतिबि

५ बालंय

सरं ॥ ५२ ॥ पत्रं शैलं मुरामांसी कक्कोलं वनितांबुदं ॥ हरिद्रे सारिवे तिक्तालवगागरु कुंकुमं ॥ ५३ ॥ चुग्नेणु
नलिकाचैभिस्तिलं मस्तु चतुर्गुणं ॥ लाक्षारससमं सिद्धं ग्रहघ्नं बलवर्णकृत् ॥ ५४ ॥ अपस्मारज्वरोन्माद
पापालक्ष्मीविनाशनी ॥ अयुःपुष्टिकरं चैव वशीकरणमुत्तमं ॥ ५५ ॥ चंदनाद्यं तैलं ॥ ॥ ज्वरसंताप
दौर्बल्ये लाक्षातैलं प्रयोजयेत् ॥ बालरोगाधिकारोक्तं पारं पर्यापदेशतः ॥ ५६ ॥ बलाश्वगंधाश्रीपर्णी
बहुपत्रीपुनर्नवा ॥ पयसा नित्यमभ्यासात् शानसंति क्षतक्षयी ॥ ५७ ॥ शर्करायवगोधूमजीवकर्षभ
कौ मधु ॥ स्तनक्षीरानुपाने चालिह्यात्क्षीणक्षतः कृशः ॥ ५८ ॥ अक्षोणिकाविषग्रंथिपद्मकेशरचंदनैः ॥

राम३

श्रृतं पयो मधुयुतं संधानार्थं पिबेत्क्षयी ॥५०॥ यवगोधूमचूर्णं वा क्षीरसिद्धं घृतप्लुतं ॥ सक्तून्वास
र्पिषाक्षौद्रसितोक्तान् क्षयशांतये ॥६०॥ घृतं बलानागबलार्जुनानां सिद्धं सयष्टीमधुकल्कपादी ॥
हृद्रोगशूलक्षयरक्तपित्तकासानिलासृक्शमयसुदीर्णं ॥६१॥ बलाद्यं नाम घृतं ॥ ॥ यष्ट्याह्वनागबलयोः
क्वाथे क्षीरसमं घृतं ॥ पयस्या पिप्पलीमांसी क्षीरासिद्धं क्षये हितं ॥६२॥ शालिमत्स्यकुमत्स्यनागबला
बालारिबीजानि ॥ चूर्णितं पयसि विपक्वं मधुघृतसंसितं यक्ष्मादिकासहरं ॥६३॥ कोलद्राक्षारसे तद्व
त्क्षीराष्टगुणसाधितं ॥ कल्कैः कट्वंगदार्वीकात्रिफलालक्षकैर्हितं ॥६४॥ घृतं खर्जूरमृद्वीकामधूकैः
सपरूषकैः ॥ सपिप्पलीकं वैस्वर्यकासश्वासज्वरापहं ॥६५॥ दशमूलेन पयसा सिद्धं मांसरसेन वा ॥ ॥५
॥५१॥ बलागर्भं घृतं सद्यो रोगोनेतान् प्रबोधयेत् ॥६६॥ रास्नावृषतकुसुमेश्च सिद्धं सर्पिः ॥ पिबेत्क्षौद्रयु
तं हितं स्त्री ॥ पक्षाणमेनसबलं चक्रा संश्वासं च हन्यादपि पांडुतां च ॥६७॥ एलाजमोदामलकाभया
क्षगायत्र्यरिष्टासनशालसारान् ॥ विडंगभल्लातकचित्रकादिकटुत्रिकांभोदसुराह्वजाश्च ॥६८॥ प
क्त्वाजले पेन पचेच्च सर्पिस्तस्मिन्प्रसिद्धेत्त्व वनारिनेच ॥ ष्टैत्रिंशांस छे श्वात्र सितोपलायाः दद्या

तुगायाश्चपलानिषट्च॥६९॥प्रस्थेघृतस्यद्विगुणंचदद्यात्क्षीरंततोमंथहतंनिदध्यात्॥पलंपलंश्वा
तरतः प्रलिह्यात्पश्चात्सिबेत्क्षीरमतंद्रितश्च॥७०॥एतद्धिमेध्यंपरमंपवित्रंचक्षुष्यमायुष्यमथोय
शस्यं॥यक्ष्माणमायुर्व्यपहंतिनूनंपांड्वामयंचैवनगंदरंच॥७१॥श्वासंचहंतिस्वरभेदकासंप्
ल्लीहगुल्मग्रहणीगदांश्च॥नचात्रकिंचित्परिवर्जनीयंरसायनंचेत्तदुपास्यमानं॥७२॥अर्कान्मि
ताक्षारजलोषितेभ्यःरसायवेभ्योविविधाश्चभक्ष्यान्॥खादेत्पिबेत्सर्पिरजाविकंचरूक्षोयवाग्रा
धा६ सहभक्तकाले॥७३॥भक्तस्योपरिमेध्येनुयथाग्निसवतारितं॥समूलफलपत्रायाःनिर्गुंड्यास्वर
सेघृतं॥७४॥सिद्धंपीत्वाक्षतक्षीणोनिर्व्याधिर्जातिदेववत्॥जीवंतीमधुकंद्राक्षाफलानिकुटज
स्यच॥७५॥सठीपुष्करमुस्तंचव्याघ्रीगोक्षुरकंबलं॥निलोत्पलंतामलकीत्रायमाणादुरालभां॥७६॥
पिप्पलींचसमंपिष्ट्वाघृतंवैद्योविपाचयेत्॥एतद्व्याधिसमूहस्यरोगराजस्यपर्ययं॥७७॥रू
पमेकादशविधंसर्पिरेतद्व्यपोहति॥ ॥जीवंतीघृतं॥ ॥क्षीरंचतुर्गुणेतैलप्रस्थंस्युद्धृतिलो
द्भवे॥शतंशःपाचितंयष्टीफलकल्केनपाचितं॥पाननस्यादिभिर्यक्ष्महद्वातानामयपांडुजीत्॥७९॥

804

॥५२॥

उर्द्ध्वजत्रुगदोन्मादरक्तपित्तविसर्पनुत्॥ ॥यष्टीतैलं॥ ॥तुलामादाय वासायाः पचेद्द्रोणे ज-
लेपि॥ तेन पादावशेषेण पाचयेदभयाढकं॥ श्लक्ष्णचूर्णीकृतं विद्वान् षंडगद्दकशतं तथा॥ ८१॥ शी-
ले॥ ८०॥ तेन पादावशेषेण पाचयेदभयाढकं॥ श्लक्ष्णचूर्णीकृतं विद्वान् षंडशर्कराशतं तथा॥ ८१॥ शी-
तीभूते निदध्याच्च क्षौद्रस्याष्टौ पलानि च॥ वंशोद्भवायाश्च क्षीरिपिप्पलीश्च पलद्वयं॥ ८२॥ चतुर्जा-
तपलं चैव चूर्णितं तत्र दापयेत्॥ स्निग्धाविलोडितं भक्षयेद्रक्तपित्ती क्षतक्षयी॥ ८३॥ कासश्वासगृ-
हीतश्च यक्ष्मणा च विशेषतः॥ कासातीसारपार्श्वार्तिः स्वरभेदास्विर्ज्वरैः॥ ८४॥ एभिः पीडितं लिंगैः
कासश्वासहृदामयैः॥ भक्तद्वेषो ज्वरः श्वासः कासः शोणितदर्शनं॥ ८५॥ स्वरभंगश्च जायेत षड्रूपे रा-
जयक्ष्मणि॥ परं दिनसहस्रं तु यदि जीवति मानवः॥ ८६॥ सुभिषग्भिरुपक्रांतस्तरुणः शोषपीडि-
तः॥ हितमत्र विशेषेण षड्रूपो ज्वसंज्ञितः॥ ८७॥ शुक्रायत्तं बलं पुंसां मलायत्तं च जीवितं॥ अतो
विशेषात्संरक्षेद्यक्ष्मणो मलरेतसी॥ ८८॥ उपद्रवांश्च स्वरभेदतादीन् जये यथास्वं प्रसमीक्ष्य
शास्त्रं॥ शोकं स्त्रियः क्रोधनतामसूयां त्यजेद्दारान् विषयान् भजेन्न गुरुं द्विजातीन् त्रिदशांस्तु पू-
जयेत्कथाश्च पुण्याः शृणुयाद्द्विजेभ्यः॥ ९०॥ ॥इति वृंदचिकित्सिते राजयक्ष्मक्षतक्षयचिकित्सा॥

वी ५

॥५

स्व ३

तेदशमोध्यायः॥ ॥अथकासचिकित्सितंव्याख्यास्यामः॥ ॥अम्लानानागरंभार्गीव्याघ्रीपर्णीचसा
धितः॥कासःपित्तःसकृष्णाचूर्णःकासश्वासौजयत्यासु॥१॥कुलत्थकंटकारीचतथाब्राह्मणयष्टि
का॥सुंठीसुरभिसंयुक्ताकासश्वासज्वरापहा॥१२॥भार्गीसनागरंसिंहीकुलत्थंमूलकंतथा॥पिबे
त्पिप्पलिचूर्णेनकासश्वासोव्यपोहति॥१३॥कफूलंकटुकंभार्गीमुस्तंधान्यंवचाभया॥सुंठीपर्प
टकंश्रृंगीसुराव्हंचजलेसृतं॥१४॥मधुहिंगुयुतंपेयंकासेवातकफात्मके॥कंठरोगेचवैश्वयेश्वास
हिक्काज्वरेषुच॥१५॥स्वरसंभ्रंगवैरस्यमाक्षिकेणसमन्वितं॥पाययेच्छ्वासकासघ्नंप्रतिस्यायकफा
पहं॥१६॥पंचमूलीकृतःकथःपिप्पलीचूर्णसंयुतः॥सन्नमप्यश्नुतोनित्यंवातकासमुदस्यति॥१७॥
भार्गीद्राक्षासठीश्रृंगीपिप्पलीविश्वभेषजः॥गुडतैलकृतोलेहोहितोमारुतकासजित्॥१८॥चूर्
र्णिताविश्वदुस्पर्शाश्रृंगीद्राक्षासठीसिता॥लीढ्वातैलेनवातोत्थंकासंजयतिदुस्तरं॥१९॥बाला
द्विबृहतीवासाद्राक्षाभिःक्वथितंजलं॥कषायेणसृतंक्षीरंपिबेत्समधुशर्करं॥१२००॥द्राक्षामलक
खर्जूरंपिप्पलीमरिच्यान्वितं॥पित्तकासहरंह्येतल्लिह्यान्माक्षिकसर्पिषा॥१॥खर्जूरंपिप्पलीद्राक्षा

विश्व

सिताल्लाजासमांशकाः॥ मधुसर्पिर्युतोलेहः पित्तकासहरः परः॥२॥ कट्फलंपुष्करंभार्गीविश्वपिप्पलि
साधितं॥ पिबेत्क्वाथः कफोद्रेके कासेश्वासेच हृद्ग्रहे॥३॥ द्वौक्षारौपंचकोलानि पंचैवलवणानि
च॥ सठीनागरकोदीच्य कल्कं वा वस्त्रगालितं॥४॥ पाययेच्च घृतोन्मिश्रं सर्वकासनिबर्हणं॥ मु
क्तामलाभ्यां यवशाटिमाभ्यां कूर्कधुनाम्लकसुंठिकेन॥ सुंठीकणाभ्यां च कुलेकेन यूषो नवांगः एर
कफरोगहंता॥ पिप्पल्यचूर्णसंयुक्तं दशमूलीजलं पिबेत्॥ पार्श्वशूलज्वरेकासेश्वासेश्लेष्मसमु
द्भवे॥ वातश्लेष्मकृतेकासेतालीसाद्यं प्रयोजयेत्॥७॥ पित्तयुक्ते भवेत्श्रेष्ठं वंशलोचनयान्वितं॥ नाग
सपत्रं मीरिचं नाचारं पिप्पलीश्तुनां॥८॥ यथोत्तरं भागवृद्ध्यात्वगेलाचार्द्धभागीके॥ पिप्पल्याष्टगु

॥५२॥ णात्वात्रप्रदेयासितशर्करा॥९॥ कासश्वासारुचिहरं तच्चूर्णं दीपनं परं॥ हृत्पांडुग्रहणीदोषप्लीह ॥५२॥

शोषज्वरापहं॥१०॥ छर्द्यतीसारशूलघ्नं मूढवातानुलोमनं॥ कल्पयेद्गुटिकां चैतच्चूर्णं पक्वासितो
पलां॥११॥ गुटिका ह्यग्निसंयोगात्तच्चूर्णाल्लघुतराः स्मृताः॥ ॥तालीसाद्यो मोदकः॥ ॥वासेकृःस्व
रसःपिबेपयोमधुयुक्तोहितासिना॥१२॥ पित्तश्लेष्मकृतेकासेरक्तपित्तेविशेषतः॥ कासेतुक्षयजे

बल्येजीवनैर्बृंहणैरपि॥१३॥शमनैःपित्तकासोक्तैरन्यैश्चविविधौषधैः॥मधुकंपिप्पलीद्राक्षा
लाक्षाशृंगीशतावरी॥१४॥द्विगुणाचतुगाक्षीरीसितासर्वैश्चतुर्गुणा॥लिह्यात्तंमधुसर्पिर्भ्यांक्षय
कासनिवृत्तये॥१५॥पिप्पलीपद्मकद्राक्षासुपक्वंबृहतीफलं॥घृतक्षौद्रयुतोलेहःक्षयकासनिबर्हणः
॥१६॥हरीतकीनागरमुस्तचूर्णंगुडेनसार्द्धंगुटिकाविधेया॥निवारयत्याशुविधारितेयंश्वासप्रवृ
द्धंप्रबलंचकासं॥१७॥नागरेणभयातद्वत्कासमाशुव्यपोहति॥दशमूलस्तः कासहिक्काश्वास
ज्वरापहः॥१८॥यवानीदीपनीवृष्यावातरोगविनाशनी॥ग्राम्यानूपोदकैःशालियवगोधूमषष्टि
कौ॥१९॥मांसैर्माषात्मगुप्तानांयूषैर्वाभोजयेद्धितान्॥सिंहास्याम्रतासिंहीनांक्वाथंमधुसमायु
तं॥२०॥पिबेत्सपित्तेकफजेकासेश्वासेक्षयेज्वरे॥विदारीक्षुमृणालानांरसान्क्षीरसितोपलाः
॥२१॥पिबेद्वामधुसंयुक्तान्पित्तकासहरान्परान्॥पिबेद्द्राक्षारसंसीतंशर्करामलकोदकं॥२२॥
इक्षुर्वाशर्करांखादेत्पित्तकासेप्रकामतः॥काकोलीबृहतीमेदायुग्मैःसहवृषनागरैः॥२३॥पित्तका
सेरसेक्षीरयूषांश्चाप्युपकल्पयेत्॥शरादिपंचमूलस्यपिप्पलीद्राक्षयातथा॥२४॥कषायेणस

तं क्षीरं पिबेत्सम धुशार्करं ॥ व्योषं पुष्करमद्दीकात्रिफलासठिचित्रकैः ॥ २५ ॥ मधुतैलयुतो लेहः कफका
सनिबर्हणं ॥ त्र्यूषणं त्रिफलाचव्यमधुतैलघृतान्वितं ॥ २६ ॥ शार्करा चंदनं द्राक्षा मधु धात्रीफलोत्पलैः ॥
एतैः समस्तमरिचसकफस घृतोनिलेः ॥ २७ ॥ देवदारु बलारास्नात्रिफलाव्योषपद्मकैः ॥ विडंगैः सितातु
ल्यं तत्कुल्यं चूर्णं सर्वकासनुत् ॥ २८ ॥ बदरीपत्रकल्कं वा घृतभ्रष्टं ससैंधवं ॥ स्वरोपघाते कासे च लेहमे
तत्प्रयोजयेत् ॥ पथ्यां सुंठी घनगुडैर्गुटिकां धारयेन्मुखे ॥ सर्वेषु श्वासकासेषु केवलं वा विभीतकं ॥
॥ ३० ॥ सितालैर्गुटिययष्ट्याह्वमांसी धूमं पिबेत्त्र्यहं ॥ गुडक्षीरानुपानं स्यात्सर्वकासनिवृत्तये ॥ ३१ ॥ मनः
शिलालमरिचमांसिमुस्तेंगुदैः पिबेत् ॥ धूमं तस्यानु च पयः सुखोष्णं सगुडं पिबेत् ॥ ३२ ॥ एष कासा

॥ ५४ ॥

न्पृथग्द्वंद्वसर्वदोषसमन्वितान् ॥ शतैरपि प्रयोगान्नु साधयेदप्रसाधितं ॥ ३३ ॥ त्वगेंगुदीब्रहहसो ॥ ५४

च तालमूली मनःशिला ॥ कर्पासास्थ्यश्वगंधा च धूमः कासनिबर्हणः ॥ ३४ ॥ मनःशिलालिप्तदला
न्बदर्यातपशोषितान् ॥ सक्षीरं धूमपानं तु महाकासनिवृत्तये ॥ ३५ ॥ कर्षः कर्षार्द्धपलं पलद्व
यं स्यात्ततोर्द्धश्च ॥ मरिचस्य पिप्पलीनां दाडिमगुडयावशूकानां ॥ ३६ ॥ सर्वौषधैरसाध्याये कासाः

घृ

सर्वै वैद्य विनिर्मुक्ताः अपि पूयं छर्दयंतां ते षामिदमोषधं शस्तं ॥ पथ्योर्द्रौलसितैलु स्येततोर्द्धैनव
द्रुत्रिकं ॥ चूर्णितं वान्हैनिक्षिप्तं पिबेत्तू मंचयोग वित् ॥ नक्षयेदथ तांबूलं पिबेद्दुग्धमथापि वा ॥ कासाः
पंचविधा यांति शांतिमाशु न संशयः ॥ ८१ ॥ कंटकारीकृतो धूमः सरुक्श्वासः सर्वकासहा ॥ समूलपत्रशाखा
याः वृहत्क्वार्या रसाढके ॥ ८० ॥ घृतप्रस्थं बलाव्योषविडंगसढिचित्रकैः ॥ सौवर्चलं यवक्षारः विश्वामल
कपौष्कैरैः ॥ ८१ ॥ वृश्चीचववृहतीपथ्यायवानीदाडिमादिभिः ॥ द्राक्षापुनर्नवाचव्यदुरालभाम्लवेतसैः
॥ ८२ ॥ शृंगीतामलकीभार्गीरास्नागोक्षुरकैः पचेत् ॥ कल्कैश्च सर्वकासेषु हिक्काश्वासेषु शस्यते ॥ ८३ ॥
कंटकारीरसं सिद्धं कफव्याधिनिषूदनं ॥ सर्पिर्गुडूचीवृषकंटकारीक्वाथेन कल्केन च सिद्धमेतत् ॥ पि
यंपुराणज्वरकासशूललीहाग्निमांद्यग्रहणीगदेषु ॥ ८४ ॥ भार्गीकल्कं घृतं वाथ पचेद्दध्नि चतुर्गुणे ॥
मधुनी संद्विगुणिते वातकासहरं परं ॥ ८५ ॥ दशमूलकषायेण भार्गीकल्कं घृतं पिबेत् ॥ दक्षितित्तिरति
र्गहेनस्परं वातकासनुत् ॥ ८६ ॥ कंटकारीगुडूच्याभ्यां पृथक् त्रिंशत्पलाद्रसे ॥ प्रस्थसिद्धो घृताद्वात
कासनुद्वह्निदीपनः ॥ कंटकारीघृतं ॥ ॥ दशमूलीचतुःप्रस्थे प्रस्थोन्मितं हविः ॥ सक्षारैः पंचकोलैः

श्वास २ ... रसैः

दार्वी दू ३

हिकल्के स्तुसाधुसाधितं ॥४९॥ कासहृत्पार्श्वशूलघ्नं हिक्काश्वासनिबर्हणं ॥ ॥दशमूलीघृतं॥ ॥
भार्गीस्वरसविपक्वरास्नाबाद्या लगोक्षुरैर्व्योषैः सर्प्पिः स्वरोपघातं निहंति कासं पंचविधं ॥५०॥ त्र्यूष
णं त्रिफलाद्राक्षाकाश्मर्याणि परूषकं ॥ द्वे पाठे देवदारुसवृष्यं चित्रकं सटी ॥५१॥ व्याघ्रीतामलकीमेदां
काकनासां शतावरी ॥ त्रिकंटकं विदारीत्वपिष्ठा कर्षसमान् घृतान् ॥५२॥ प्रस्थं चतुर्गुणं क्षीरं सिद्धं कास
हरं पिबेत् ॥ ज्वरगुल्मारुचिप्लीहशिरोहृत्पार्श्वशूलनुत् ॥५३॥ कामलार्शोनिलाष्ठीलाक्षतशोषक्ष
यापहं ॥ त्र्यूषणं नाम विख्यातं घृतं नाम तदुत्तरं ॥५४॥ आपोत्थ्यहिलिरिणाम् मुद्गाः पचह्लीरे चतुर्गुणे ॥
द्राक्षाकल्केर्घृतं सिद्धं तस्मीतं पित्तकासनुत् ॥५५॥ द्रोणेपां साधयेद्रास्नां दशमूलीशतावरी ॥ पा

॥५५॥

लिकान् माषिकां साश्च कुलत्थान् बदरायवान् ॥५६॥ तुलार्द्धं वाजमांसस्य पादशेषेण तेन तु ॥ घृताढ

॥५५॥

कं समं समं क्षीरं जीवनीयैः पलोन्मितैः ॥५७॥ सिद्धं तदग्निः कल्कैर्नस्यापानानुवासनैः ॥ समीक्ष्य
वातरोगेषु यथावत् संप्रयोजयेत् ॥५८॥ पंचकासान् शिरःकंपं शूलं वंक्षणयोनिजं ॥ सर्वांगैकांग
रोगांश्च सप्लीहोर्द्ध्वानिलं जयेत् ॥५९॥ दशमूलीस्वयंगुप्तां शंखपुष्पां सटी बलां ॥ हस्तिपिप्पल्य

111

पामार्गपिप्पलीमूलचित्रकान्॥ ६०॥ येच श्विन्नेः कषायंतं प्रतंतच्चनयाशतं॥ पचेद्गुडतुलांदत्वाकुड
वंचपथक्घृतात्॥६१॥ मार्गीपुष्कर मूलंचद्विपालांशान्यवाढकं॥ हरीतकीशतंचैकंजलपंचाढके
पचेत्॥६२॥ तैलास्सिप्पलीचूर्णाच्चसिद्धशीतेचमाक्षिकात्॥ लेहयेत्द्वेभयेनित्यमतःस्वादेद्रसायनं
॥६३॥ तद्वलीपलितंहन्यावर्णापुर्वलवर्द्धनं॥ पंचकासान्क्षयंश्वासंहिक्कांसविषमज्वरान्॥६४॥ ह
न्यात्तथागृहण्यर्शोहृदोगारुचिपीनसान्॥ अगस्तिविहितंपुण्यमिदंश्रेष्ठंरसायनं॥६५॥ अगस्ती
हरीतकी॥ ॥ कूष्मांडकात्पलशतंसुश्विन्नंनिःकुलीकृतं॥ प्रस्थंतैलघृतंदेयंतस्मिन्भृतप्रदापये
त्॥६६॥ त्वपत्रधान्यकव्योषजीरकैलाद्वयानलं॥ ग्रंथिकंचव्यमातंगपिप्पलीशृंगवेरयोः॥६७॥ शृंगा
टकंकसेरूणिप्रलंबाःतालमुस्तकं॥ चूर्णीकृतंपलांशेनगुडस्यतुलयापचेत्॥६८॥ शीतीभूतेपला
न्यष्टौमधुनःसंप्रदापयेत्॥ कफपित्तानिलहरंमंदाग्नीनांचदीपनं॥६९॥ कृशानांबृंहणश्रेष्ठंवाजी
करणमुत्तमं॥ प्रमदासुप्रसक्तानांयेचस्युःक्षीणरेतसः॥७०॥ क्षयेणचगृहीतानांपरमेतद्भिषग्म
तं॥ कासंश्वासंज्वरंहिक्कांहंतिघर्दिनसंशयः॥७१॥ गुडकुष्मांड यस्मात्रब्रह्मात्रियेन निर्मितं॥५॥

गुडकुष्मांडकावलेहः॥ ॥लवंगजातिफलपिप्पलीनां भागो मितान् कर्षसमान् प्रकुर्यात्॥ पलार्द्धमेव
मरिचस्य दद्यात् पलानि चत्वारि महौषधस्य॥ सितासमं चूर्णमिदं प्रसह्य रोगानिमान्वै प्रबलान्नि
हंति॥७२॥ कासज्वरारोचकमेहगुल्मश्वासाग्निमांद्यग्रहणीप्रदोषान्॥ हृत्कंपनासावदनप्रबोधं
करोति संदीपयते च वह्निं॥७३॥ ॥समशर्करं चूर्णं॥ ॥इति कासचिकित्सितं एकादशो ध्यायः॥११॥
॥ ॥अथ हिक्काश्वासचिकित्सितं व्याख्यास्यामः॥ ॥हिक्काश्वासी पिबेद्भार्गीं सविश्वामुष्णवारिणा॥
नागरं वा सिता भार्गीसौवर्चलसमन्वितं॥ दशमूलस्य वा क्वाथमथवा देवदारुणः॥७५॥ तृषितो मदि
रां वापि हिक्काश्वासी पिबेन्नरः॥ भल्लातकं मधुपर्णी पथ्या दशमूलमेव क्वाथः॥७६॥ तमकेऽकं कफप्र
धाने शस्तः श्वासे च मारुतोद्रेके॥ पथ्या कषायमथवा पिबेद्द संमार्गस्य वा मधुना॥७७॥ तमके रूरू
क्षूरयवासनागरक्काथमेव वा॥ दशमूलीसठीरास्नापिप्पलीविश्वपौष्करैः॥७८॥ शृंगीतामलकी
भार्गीगुडूचीनागरादिभिः॥ यवागूर्विधिना सिद्धां कषायं वा पिबेन्नरः॥७९॥ नानार्थं कल्पयेत्क्ला
सहिक्काश्वासनिवृत्तये॥ कासमर्द्दार्द्दपत्राणां यूषः शोभांजनस्य च॥८०॥ शुष्कमूलकयूषश्च हि
कासहृत्कहपार्श्वार्त्तिहिक्काश्वासप्रशांतये॥ कुलत्थयवकोलाम्लदशमूलवलाजलं॥८१॥

॥५५६॥

॥५६

जातिफल।वेला।लंवग॥ हरीतकी श्रवलकरीवेल्ड॥ मनुका। खारिक। आउला॥

नागार्थकुल्यपेला सहिक्काश्वासनिचमये॥पुष्करमूलकयूषश्चहिक्काश्वासनिवारणः॥सदधिव्योषसर्प्पिष्कोयूषेवार्त्ताकुजोहितः॥२॥भृंगीकटुत्रिफलंत्रयंकंटकारीनागीसपुष्करजटालवणानिपंच॥चूर्णंपिबदशिशिरेणजलेनहिक्काश्व।सोर्द्ध्ववातकसनारुचिपीनसेषु॥३॥सटीचोरकजीवंतीत्वग्मुस्तंपुष्कराह्वयं॥सुरसंतामलक्योलापिप्पल्यगुरुनागरं॥४॥वालकंचसमंचूर्णंकृत्वाष्टगुणशार्करं॥सर्वदातमकेश्वासेहिक्कायांप्रशस्यते॥५॥सुंठीकृष्णामिरिचनागदलत्वगेलाचूर्णंकृतंक्रमविवर्द्धितमूर्द्धमन्यात्॥पादादिदंसमसितंगुदजाग्निमांद्यगुल्मारुचिश्वसनकंठहृदायमेषु॥६॥

स्वा

कोलमज्जांजनंलाजातिक्ताकांचनगैरिकं॥कृष्णाधात्रीसिताशुंठीकासीसदधिनामयः॥७॥पाटल्याफलसंपुष्पंकृष्णारवर्जूरमुस्तकं॥षडेतेपादिकालेहाहिक्काघ्नामधुसंयुताः॥८॥मधुकंमधुसंयुक्तंपिप्पलीशार्करान्वितं॥नागरंगुडसंयुक्तंहिक्काघ्नंनावनंत्रयं॥९॥स्तन्येनमाक्षिकंविष्टानश्यंवालक्तकांबुना॥योज्यंहिक्काविनाशायस्तन्यंवाचंदनान्वितं॥१०॥कृष्णामूलकसुंठीनांचूर्णंमधुसितायुतं॥मुहुर्मुहुप्रयोक्तव्यंहिक्काश्वासनिवारणं॥११॥मधुसौवर्चलोपेतंमातुलुंगरसंपिबेत्॥

हिक्कार्त्तोमधुनालिह्यात्सुंठीधात्रीकणान्वितं ॥१२॥ प्राणावरोधनतर्जनविस्मापनैश्शीतवारिणापरिषेकैः ॥
चित्रैककथाप्रयोगैः शमयेद्धिक्कामनोभिघातैश्च ॥१३॥ हिक्काश्वासातुरे पूर्वं तिलोत्कः स्वेद इष्यते ॥ ऊर्द्ध्व
धिः शोधनं शान्ते दुर्बले शमनं ततः ॥१४॥ अनयानागरकल्कं पौष्करस्य क्रमिरिचकल्कं वा ॥ तोयेसो
ष्णेनपिबेत् श्वासीहिक्कीचतद्धान्तये ॥१५॥ पक्विबिल्वफलावधं उष्णंवातानुभोजनं ॥ नेषतं पानमन्नं वा हि
काश्वासेषु तक्षितं ॥१६॥ अम्लानानागरं फंजीव्याघ्रीपल्लवसाधितं ॥ क्वाथः पीतः कणीचूर्णः कासश्वासौज्ये
सोव्यपोहति [illegible] ॥ दशमूलकषायश्च पुष्करेणावचूर्णितः ॥१८॥ श्वासकासा [illegible] प्रशमनः पार्श्वः हृ
तूस्थलनाशनः ॥ कुलत्थनागरव्याघ्रीवासाभिः क्वथितं जलं ॥१९॥ गुडंकटुकतैलेन मिश्रयित्वा समंलि
हेत् ॥ त्रिसप्ताहप्रयोगेण श्वासं निर्मूलतो जयेत् ॥१२०॥ द्राक्षांहरीतकींकृष्णांकर्कटाख्यं दुरालभां ॥
विलिहेन्मधुसर्पिर्भ्यां श्वासान्हंति सुदारुणान् ॥१॥ सठीभार्गीकचाव्योषपथ्यारुचककफलं ॥ ते
[illegible] पुष्करश्रृंगीसक्षौद्रं श्वासकासनुत् ॥२॥ गुडोषणनिशारास्नाद्राक्षाभागधिकासमा ॥ तै
लेनचूर्णितान्हंतिदातिचश्वासनुदास्मता ॥३॥ प्रत्रियामधुसर्पिर्भ्यां भार्गीमधुकसंयुतं ॥ प

वं ॥१७
स्नाग
तुल्याक
श्वासो

॥५७॥

॥५७

त ५

115

ध्यातिक्ताक्रणाव्योषयुक्तावाश्वासनाशनी॥४॥गुडदाडिममन्हीकापिप्पलीविश्वकंघृते॥मातुलिं
गरसंक्षोद्रलीढंश्वासनिवारणं॥५॥लाजाबदरमज्जामश्वांजनाःपिप्पलीक्रणाः॥शिरीषपुष्पसे
युक्तंश्वासहीकाहरंपरं॥६॥सढीपुष्करमूलंचचूर्णमामलकस्यच॥मैनासंयुक्तंलेह्यंचूर्णंवाक्वालले
हजं॥७॥पिप्पलिमधुसंयुक्तारसोधात्रीकपित्थयोः॥लाजालाजामधुद्राक्षापिप्पल्यश्चसद्रसं॥
॥८॥लिह्यात्कोलमधुद्राक्षापिप्पलीनागरेणवा॥सुखोष्णं घृतमश्वासैंधवेनावचूर्णितं॥९॥नाव
यन्माक्षिकं॥बिल्वंबिल्वामलरसेनच॥नारीक्षीरेणवासिद्धंसार्पिर्मधुरकैःस्तथा॥१०॥नासानिषिक्तं
पीतंवासद्यो हिक्कांनियच्छति॥नेपाल्यागो॥विषाणवाकुष्टान्सर्जरसस्यच॥११॥धूमंकुशस्यवासा
ज्यंपिबेद्धिक्कोपशांतये॥रसंसंगृह्यनार्ग्यासुरसेवस्त्रेपरिस्रुते॥१२॥आलोड्यचतुलांपूतांगुडस्य
तनयावत॥पुनःपचेच्चमदग्नौयावल्लेह्यमागतं॥१३॥शीतेतुमधुनश्चात्रषट्पलानिप्रदापये
त्॥त्रिकुटंत्रिसुगंधंचपलिकाश्चपथक्पथक्॥१४॥कर्षंयद्वयंचक्षारंसंचूर्ण्यप्रक्षिपेततः॥नक्षये
दभयामेकांलिहस्यार्धपलंलिहेत्॥१५॥श्वासंसुदारुणंहंतिकासंपंचविधंतथा॥स्वरवर्णप्रदोह्य

षजटराग्नेश्च दीपनः॥१६॥ हरीतकी शतं कस्य वारि प्रस्थे महाधिकं॥ नागरं गुडः कुष्ठोदशमूलं
चतथैव द्विजयष्टिका॥१७॥ शतं शतं च संगृह्य तोयद्रोणे विपाचयेत्॥ पादावशेषे तस्मिंस्तु गुडस्या
र्द्ध पलं क्षिपेत्॥१८॥ शीतीभूते च पक्वे च मधुनाष्टौ पलानि च॥ षट् चानि तु गा क्षीर्याः पिप्पल्याश्च
पल द्वयं॥१९॥ त्रिसुगंधिसुगंधं चरवादेदग्नि बलं प्रति॥ श्वासं कासं ज्वरं हिक्कां नाशयेत्तमतंतया
॥२०॥ योगसंहरीनादस्त्रवद्धवै योपदेशतः॥ जलं पंचगुणं देयं मपित्वा द्रोणवारिणः॥२१॥ मान
सांनिध्यसंवादा द्विपलं त्रिसुगंधिनः॥ ॥कुलत्थगुडः॥ ॥दशमूली रसे सर्पिर्द्दधि मंजेन सा
धयेत्॥२२॥ सत्क्वासौवर्चलक्षारवयस्था हिंगुचोरकैः॥ कासस्वयाचतत्पानाद्धिक्काश्वासो नियच्छ
ति॥२३॥ तेजोवत्स नया कुष्ठं पिप्पली कटुरोहिणी॥ भूतीकं पौष्करं मूलं पलाशं चित्रकं सटी॥२४॥
सौवर्चलं तामलकी सैंधवं बिल्वं त्रिकं॥ तालीसपत्रं जीवंती वचां ते रक्षसंमते॥२५॥ हिंगुपादैघृ
तप्रस्थं पचेत्तोये चतुर्गुणे॥ एतद्यथाबलं दद्याद्धिक्काश्वासौ जयेन्नरः॥२६॥ शोषानिलार्शोग्रहणि
हृत्पार्श्वरुजएव च॥ वासाघृतं पिबेद्वापि बृंहणमेव वा॥२७॥ ॥इति हिक्काचिकित्सितं॥

॥५८॥

॥५८॥

दशाध्यायः॥ ॥अथ स्वरभेदचिकित्सितं व्याख्यास्यामः॥ ॥आद्ये कोष्णजलं पेयं जग्ध्वाथ घृ
तगुडौदनं॥ क्षीरानुपानं पित्तोत्थे पिबेत्सर्प्पिरतंद्रितः॥२८॥ पिप्पलीपिप्पलीमूलं मरिचं विश्व
भेषजं॥ पिबेन्मूत्रेण मतिमान् कफजे स्वरसंक्षये॥२९॥ स्वरोपघाते मेदोजे कफवद्विधिरिष्य
ते॥ क्षयजे सर्वजे वापि प्रत्याख्यायाचरेत् क्रिया॥३०॥ चव्याम्लवेतससकटुत्रिकतिंतिडीकतालीसजीर
कतुगादहनैः समांशैः॥ चूर्णं गुडप्रमृदितं त्रिसुगंधियुक्तं वैस्वर्यपीनसकफारुचिषु प्रशस्तं॥
॥३१॥ बदरीपत्रकल्कं वा घृतभृष्टं ससैंधवं॥ स्वरोपघाते कासे च लेहमेकं प्रयोजयेत्॥३२॥ शर्क
रामधुमिश्राणि शृतानि मधुरैः सह॥ पिबेत्पयांसि यस्यापि छेदतोभिहतः स्वरः॥३३॥ व्योषं
हरीतकीक्षारं चव्यं भार्गीसचित्रकं॥ लिह्याच्चूर्णानि मधुना तीक्ष्णा मद्यं पिबेदथ॥३४॥ सयावशूर
कान् समधुतैलयुक्तान् लिह्याच्च योगान् कटुकीननीक्ष्णं॥ फलत्रिकं त्र्यूषणयावशूककल्कं चूर्णं च
लिह्यात्स्वरभेदहंतृ॥३५॥ सर्प्पींषि पारिजुकानि स्वरभेदे निलात्मके॥ चतुःप्रयोगैः शस्तेश्य
बलारास्नाशताह्वयैः॥३६॥ बर्हितित्तिरदक्षाणां पंचमूलीशृतान् सरान्॥ मायूरं क्षीरसर्प्पिर्वा

पिबेत्र्यूषणमेव वा ॥ ७ ॥ कासमर्दकवार्ताकमार्कवस्वरसैर्युतं ॥ सिद्धं घृतं हत्स्वानिलं सिद्धं वार्ताकजे
रसे ॥ ८ ॥ यवक्षाराजमोदाभ्यां चित्रकामलकेषु च ॥ देवदार्व्याग्निकाभ्यां च सिद्धमाज्यं समाक्षिकं ॥
॥ ९ ॥ घृतं रसैर्वा त्रि ॥ रवितित्तिरीणां ॥ हूपंचमल्लीघ्नथितं विपक्वं ॥ निर्दग्धिकात्र्यूषणबालाबिल्वं

॥५९॥

कल्कं पिबेत्स्वरभेदहंत ॥ १० ॥ लिह्यान्मधुरकाणां वा सिद्धमाज्यं समाक्षिकं ॥ शतावरीचूर्णयोगं
बलाचूर्णमथापि वा ॥ ११ ॥ जीवनीयोपसिद्धं वा पिबेत्क्षीरं सशर्करं ॥ शीतं माक्षिकसंयुक्तं पैत्तिक
स्वरबोधनं ॥ १२ ॥ तुगास्त्विचः क्षीरवहांशुमाणां सैसंक्षुद्य काथं विपचेद्घृतेन ॥ कल्केन यष्टीमधु
कस्य सर्पिः सिद्धं पिबेत्तन्मधुशर्करोक्तं ॥ १३ ॥ वाते सलवणं तैलं पित्ते सर्पिः समाक्षिकं ॥ कफे सक्षा

॥५८॥

रकटुकं क्षौद्रं कवलं धार्यते ॥ १४ ॥ गले तालुनि जिह्वायां दंतमूलेषु वाश्रितिः ॥ तेन निष्ठीव्यते श्लेष्मा स्व
रश्चाशु प्रसीदति ॥ १५ ॥ तैलोक्तं स्वरभेदे च शाषादिरं धारयेन्मुखे ॥ पथ्यापीप्पलिसंयुक्तं संयुक्तं नागं
गरेण वा ॥ १६ ॥ व्याघ्रीस्वरसविपक्वं रास्नाकघ्नलकगोक्षुरयोश्च ॥ सर्पिः स्वरोपघातं हन्यात्का
सं च पंचविधं ॥ १७ ॥ शुष्कद्रव्यमुपादाय स्वरसानामसंभवे ॥ वारिण्यष्टगुणे साध्यं ग्राह्यं पादाव

न्नोऽपित्तं॥४८॥ ॥इति स्वरोपघातचिकित्सितं संपूर्णं त्रयोदशोऽध्यायः॥१३॥ ॥अथारोचकचिकित्सि
तं व्याख्यास्याम॥ ॥अरुचिं कवलग्रहाः धूमाः समुखधावनाः॥ मनोज्ञमन्नपानं वा हर्षणाश्वा
सनानि च॥४९॥ वातोऽस्वादिरनिले विधिवस्ति वचासुस्नेहोष्णतोयमदिरान्यतमेन चूर्णं॥ कृष्णा
विडंगयवभस्महरेणुभार्गीरास्नैलहिंगुलवणोत्तमनागराणां॥५०॥ पित्ते गुडांबु मधुरैः वमनं
प्रशस्तं लेहः ससैंधवसितामधुसर्पिरिष्टः॥ निंबांबुच्छर्दितवतः कफजे तु पानं राजद्रुमांबु मधु
ना सह दीप्यकाढ्यं॥५१॥ चूर्णं यदुक्तमथवानिलजे तदेव सर्वैश्च सर्वकृतमेवमुपक्रमेण॥ ब
स्तिः समीरणे पित्ते विरेकं वमनं कफे॥ कुर्याद्धृद्यानुकूलानि हर्षणं च मनोज्ञने॥ इख्याविघातम

भ

यशोकहतेतसो मर्माबान्नवाद्यवितरे स्वलु शाक्यरूपान्॥ सर्वेषु तेषु मतिवादिपुनर्नवायाः
पौराणिकैरनुपथैरनुसांत्वयेत्तं॥५२॥ सन्मांसखादुसुरचितान्विविधांश्च भक्ष्यान् पानानि मूल
फषाय्यवरांगलेह्यान्॥ सेवेद्रसांश्च विविधान्विविधे प्रयोगे भुंजीत चापि लघु रूक्षमनःसु
खानि॥५५॥ अम्लीकार्द्रकतोयं च त्वगेलामरिचान्वितं॥ अभक्तच्छंदरोगेषु शस्तं कवलधा

रणं ॥५६॥ कुष्ठसौवर्च्चलाजाजीशर्करामरिचं बिडं ॥ धान्येलापद्मकोशीरं पिप्पलीचंदनोद्भवं ॥५७॥

लोध्रं तेजोवती पथ्या त्र्यूषणं सयवाग्रजं ॥ अद्रिदाडिमनिर्याससाजाजीशर्करायुतः ॥५८॥ सतैलमा

क्षिकाश्चैते चत्वारः कवलग्रहाः ॥ चतुरो रोचकान् हन्या वाताद्यैकजसर्वगान् ॥५९॥ त्र्यूषणानि त्रिफ

व

लारजनीद्वयं चूर्णितानि निम्बकविमिश्रितानि ॥ क्षौद्रान्वितानि वितरेन्मुखधावनार्थमन्याति तिक्त

कटुकानि च भेषजानि ॥६०॥ क्षारव्यजाजीमरिचं द्राक्षाम्लदाडिमं समं ॥ सौवर्च्चलं गुडः क्षौद्रः सर्वारो

चकनाशनं ॥६१॥ यवानीतिंतिडीकं च नागरं चाम्लवेतसं ॥ दाडिमं बदरं चाम्लं कार्षिकानुपकल्पये

त् ॥६२॥ धान्यसौवर्चलाजाजीवरांगं चार्द्धकार्षिकं ॥ पिप्पलीनां शतं चैकं द्वे शते मरिचस्य च ॥६३॥

न्य

शर्करायाश्च चत्वारि पलानि एकत्र चूर्णयेत् ॥ जिह्वाविशोधनं हृद्यं तच्चूर्णं भक्तरोचनं ॥६४॥ हृत्प्ली

॥६०॥

हपार्श्वशूलघ्नं विबंधानाहनाशनं ॥ कासश्वासहरं ग्राहि ग्रहण्यर्शोविकारनुत् ॥६५॥ ॥ यवानीषा ॥६

डवः ॥ इति [illegible] अरोचकाधिकारश्चतुर्दशोऽध्यायः ॥ ॥ अथ छर्दिचिकित्सितं व्याख्यास्यामः ॥

आमाशयोत्क्लेशभवा हि सर्वाः छर्द्यो मताः लंघनमेव तस्मात् ॥ प्राक्कारयेन्मारुतजाविकाराः संशोध

121

नं वा कफपित्तवारि ॥ ६६ ॥ हन्याक्षीरोदकं पीतं छर्द्दिं पवनसंभवां ॥ ससैंधवं पिबेत्सर्प्पिः वात छर्द्दिनिवारणं ॥ ६७ ॥ मुद्गामलकयूषो वा ससर्प्पिष्कः ससैंधवः ॥ यवागूं मधुमिश्रां वा पंचमूलीकृतां पिबेत् ॥ ६८ ॥ पित्तात्मिकायां त्वनुलोमनार्थं द्राक्षाविदारीक्षुरसैस्त्रिवृत्स्यात् ॥ कफाशयस्थं त्वतिमात्रवृद्धं पित्तं हरेत्स्वादुभिरूर्द्ध्वमेव ॥ ६९ ॥ मुद्गस्य कोलमधुशर्कराभ्यां लाजैश्च मंथं यदि वापि पेयां ॥ प्रदापयेन्मुद्गरसेन वापि शाल्योदनं जांगलजैः रसैर्वा ॥ ७० ॥ चंदनस्याक्षमात्रेण संयोज्यामलकीरसं ॥ पिबन्माक्षिकसंयुक्तं छर्द्दिस्तेन निवर्त्तते ॥ ७१ ॥ कषायो भ्रष्टमुद्गस्य सलाजमधुशार्करः ॥ छर्द्यतीसारतृड्दाहज्वरघ्नः संप्रकाशितः ॥ ७२ ॥ हरीतकीनां चूर्णं तु लिह्यान्माक्षिकसंयुतं ॥ अधोभागे कृते दोषैः छर्द्दिस्तेन प्रशाम्यति ॥ ७३ ॥ क्वाथः पर्प्पटकः शीतः सक्षौद्रः छर्द्दिनाशनः ॥ गुडूचीत्रिफलारिष्टपटोलैः क्वथितं जलं ॥ ७४ ॥ क्षौद्रयुक्तं पिबेत्स्याच्छुपित्त पासा छर्द्दिशांतये ॥ कफात्मिकायां वमनं प्रशस्तं सपिप्पलीसर्षपनिंबतोयैः ॥ ७५ ॥ पिंडीतकैः सैंधवसंप्रयुक्तैः छर्द्यां कफामाशयबोधनार्थं ॥ विडंगत्रिफलाविश्वचूर्णं मधुयुतं पिबेत् ॥ ७६ ॥ विडंगप्लवशुंठीनामथवाश्लेष्मजां वमीं ॥ सयावक्षं वा बदरस्य चूर्णं मुस्तायुतां कर्कटकं

द्रा क्षो

स्यग्रंगी ॥ ७७ ॥ दुरालभां वा मधुसंप्रयुक्तां लिह्यात्कफे छर्दिविनिग्रहार्थं ॥ संतर्पणं मधुयुतं तिसृणामथ

भेषजं ॥ ७८ ॥ कृतं कृच्छ्रा विधिवत्कषायं हिमसंज्ञितं ॥ तिस्रश्चापि पिबेत्सथ्यं माक्षिकेण समायुतं ॥ ७९ ॥

श्रीफलस्य गुडूच्या वा कषायो मधुसंयुतः ॥ पेयः छर्दिजये सीतो मूर्छावातं दुलंबुना ॥ ८० ॥ जंबाम्रपल्ल

वगवेधुकधान्यसेव्यह्रीवेरवारि मधुना पिबतोल्पमल्पं ॥ छर्दिः प्रयाति सुपरामं त्रिसुगंधियुक्ता ली

ढं निहंति मधुनो दुरालभा वा ॥ ८१ ॥ जातीरसः कपित्थस्य पिप्पलीमरिचान्वितः ॥ क्षौद्रेण युक्तः शमये

ल्लिहो वा छर्दिमुल्बणां ॥ ८२ ॥ सौवर्चलमाजाजीचन्द्रार्करामरिचानि च ॥ युक्तोयं मधुना लेहः श्रेष्ठश्छर्दि

निवारणः ॥ ८३ ॥ कोलमज्जा कणा धात्री लाजा विश्व फलत्रिकं ॥ श्यामांजनं चक्रोला स्थिमाक्षिकाव

न्हिनायुतं ॥ ८४ ॥ कणोषणं कपित्थं च त्वगेलापत्रकं समं ॥ सक्षौद्रपादिकालेहः षडेते छर्दिनाशनाः

॥ ८५ ॥ एलाकपित्थमधुमागधिकोषणानां क्षौद्रान्वयात्रिकटुधान्यकजीरकाणां ॥ पथ्यासितामरि

चमाक्षिककपिप्पलीनां लेहास्त्रयः सकलवम्यरुचिप्रशांत्यै ॥ ८६ ॥ एलालवंगगजकेसरकोलमज्जा

लाजाप्रियंगुघनचंदनपिप्पलीनां ॥ चूर्णानि माक्षिकसितासहितानि लीढ्वा छर्दि निहंति कफमा

स

॥६१॥

॥६१

123

कृतपित्तजानां ॥८७॥ ॥एलादिचूर्णं॥ ॥जंब्वाम्रपल्लवरसं सक्षौद्रं दत्वा सुशीतलं तोयं ॥ लाजैरेव चूर्णं पि
बेत् छर्द्यतिसारे परं सिद्धं ॥८८॥ पवनघ्नी चिरोत्थासु सर्वास्वेव ज्या छर्दिषु क्रिया ॥ छर्दिप्रसंगात्पवनो ह्यव
श्यं धातुक्षयाद्वृद्धिमुपैति तस्मात् ॥८९॥ चिरप्रवृत्तास्वविलायहानि निरूहणान्युपसंहनन वृंहणानि ॥
सर्पिर्गुडाक्षीरविधि घृतानि कल्पाश्च यूषणजीवनानि ॥९०॥ वर्ष्यास्तथा मांसरसाः सलेहाः छर्दिं चि
रोत्थां प्रशमं नयंति ॥ बीभत्सजां हृद्यतमैर्हरेत्ति वांछाहितैः फलैः ॥९१॥ लंघनैर्वमनैश्चामांसात्म्यैर्वा
सात्म्यकोपजां ॥ कृमिहृद्रोगवच्चापि साधयेत् कृमिजां वमीं ॥९२॥ विदलानि च मुद्गानां पिप्पल्यश्चापि चू
र्णिताः ॥ आमृतं सलिलं पेयं मधुना छर्दिनाशनं ॥९३॥ चंदनं तु मृणालं वा बालकं नागरं वृषं ॥ सतंदुलो
दकक्षौद्रैः पीतः कल्को वमिं जयेत् ॥९४॥ सोदीच्यं गैरिकं देयं सव्यं वा तंदुलांबुना ॥ ॥इति छर्द्यधिकारो ना
म पंचदशोध्यायः ॥ ॥अथ तृष्णाचिकित्सितं व्याख्यास्यामः ॥ ॥मधुरैः संजीवनीयैः शीतैश्च सतिक्तं
शृतं क्षीरं ॥ पानाभ्यंजनसेकैः शिष्टं नस्यमपि च स्यात् ॥ जंब्वाम्रातकबदरीनलवेतसवल्कपंचाम्लैः
॥९६॥ हन्मुखवक्त्रप्रदेहाः स्तनामूर्च्छार्त्तिभ्रमतृष्णाघ्नाः ॥ दाडिमदधित्थलोध्रैः विदारीबीजपूरकैः ॥९७॥

द

शिरसो लेपो गोरामलकैश्च तारनालयुतैश्च सहितैः॥ शैवालपंकजलैः साम्लैः सघृतैश्च सक्तुभिर्लेपः
॥ ९८ ॥ मस्तरेनावेल्लसनार्द्रकमलमणिहारसंस्पर्शाः॥ शिशिरांबुचंदनार्द्रस्तनतटपाणितलगात्रसंस्प
र्शाः॥ ९९ ॥ क्षौद्रान्वितवसनानां वरांगनानां प्रियाणां च॥ हिमवद्दरीवनसरित्सरोंबुजावन्यदुपाद
शिशिराणां॥ १०० ॥ रम्योदकयुक्तानां स्मरणं कथाश्च तच्छायाः॥ वातघ्नमन्नपानं मृदुलघुशीतं च वा
तत्छायाः॥ १ ॥ सञ्जीवनीयसिद्धं क्षीरं घृतं वा पित्तजे तर्षे॥ पिबेद्द्राक्षाचंदनखर्जूरमधुयुतं तोयं॥ २ ॥
लोहितकशालितंदुलखर्जूरपरूषकोद्राक्षा॥ मधुपक्वलोष्टमेवच जलस्थितं शीतलं तोयं॥ ३ ॥ लोहित

॥६२॥

कशालिपरूषसमधुकलोध्रांजनोत्पलक्षुद्राः॥ पक्वामल्योथमधुजलसमायुतो मन्थ्यये पेयः॥ ४ ॥ वट
मातुलुंगवेतससुक्षशाकाम्रामलकयष्ट्याह्वैः॥ सिद्धं नयन्निति तां क्षुण्णमंदं कषायसिक्तां वा॥ ५ ॥ वातोम्ला
निनचक्रपालन्यथवानिर्वाप्यपायतेनाग्रे॥ आमनशर्करांवामृतवल्लिजलं वा तृष्णां हंति॥ ६ ॥ क्षीरवतां
मधुराणां शीतानां शर्करामधुविमिश्राः॥ शीताः कषायाः मद्ध्वष्टसंयुताः पित्ततर्षघ्नाः॥ ७ ॥ घोषकफाम्भ
ल्लातकतिक्तकषायात्तथा मन्त्छायां॥ यथोक्तं कफजायां घर्यातिव्रेवकार्यं स्यात्॥ ८ ॥ सहारुच्याविया

॥६२

125

कांबलस्य छर्दिष्टक्क पूनुगांतक्ष्मां॥ ज्ञात्वामदधितणलवलोष्णजलैर्वमनमिष्टं॥१०॥ दाडिमम्लफ
लचाप्यथ तूषक्कषायालेणमथलेहं॥ लेहमथवाप्रदद्याद्रजनीमधुशर्करायुक्तं॥११॥ क्षयकासे
ननुतुल्यासयत छागरीयसीन्नृणां॥ क्षीणक्षतशोषहितैस्तस्मात्तां नेषजैः शमयेत्॥१२॥ पानल
जार्त्तपानंनस्पर्द्धीदक्कमम्लवणगंधाद्यं॥ शिरःस्नानःपानमथांबुगुडांबुवातृषितः॥१३॥ मकोपरो
धतृषितःस्नेहतडार्त्तोथवातनुयवागुं॥ प्रपिबेदुरणातृषितोनुक्तेनतदुष्टरोगंद्दक्तं॥१४॥ मद्यांबु
चांबुचोष्णंबलवान् तृषितःसमुल्लिखेत्पिबा॥ मागधिकाविश्रादसुखःसशर्करंनापिबेन्मंथं॥१५॥
बलवांस्तुनलुशोषेपिबेद्घृतंवक्षमन्नमद्यंवा॥ सर्पिर्विन्नष्टंक्षीरंमांसरसाश्वाबलःस्निग्धान्॥१६॥
तच्छायांपयनोस्वयांसगुडंदधिशस्पते॥ रसाश्वबृंहणाःशीताःगुडूच्यारसएववा॥१७॥ पंचाम्लिकाः
पंचगुणायनुक्तास्तेषेपुसिद्धंप्रथमेगणेवा॥ पिबेत्सुखोष्णंमनुजोसलश्च्युतषोपरोधंनकदापिकु
र्यात्॥१८॥ पित्तोन्मित्तांपित्तहरैर्विपक्वंनिहंतितापंपयएववापि॥ काश्मर्यशर्करायुक्तंचंदनोशी
रपद्मकैः॥१९॥ द्राक्षामधुकसंयुक्तंपित्ततृड्जलंपिबेत्॥ बिल्वाढकीधातकिपंचकोलदर्भैःसुसि

हृत्कफजा निहंति ॥२०॥ हितं जवे छर्दिघ्नमेव वा त्रतप्तेन निंबपत्रवोदकेन ॥ ससासिवांदोहणपंचमू
लेतथोसिंदौ मधुरेगणे च ॥२१॥ कुर्यात्कषायं तु तथैव कल्कान् मधूकपुष्पादिषु चापरेषु ॥ सजी
रकान्यार्द्रकशृंगवेरसौवर्चलान्यर्द्धपलमुतानि ॥२२॥ मद्यानि हृद्यानि च गंधवंति पीतानि सद्यः
शामयंति पुंसां ॥ आम्रजंबुकषायं वा पिबन्माक्षिकसंयुतं ॥२३॥ छर्दिः सर्वा प्रणुदति तृष्णां चैवोपक
र्षति ॥ गोस्तनेक्षुरसक्षीरयष्टीमधुसमूसलैः ॥२४॥ नियतं नस्यतः पीतैः तृष्णाशाम्यति दारुणा ॥
क्षीरेक्षुरसमृद्वीकासौद्रसिंधुगुडोदकैः ॥२५॥ वृक्षाम्लाम्लैश्च गंडूषा तालुशोषप्रणाशनाः ॥ वे
शांधंजनयत्सास्यैसंदधाति मुखे व्रणान् ॥२६॥ दाहतृष्णाप्रशमनं मधुगंडूषधारणं ॥ वारिशीतं
मधुयुतं साकं टाहापिपासितं ॥२७॥ पाययेद्वामयेच्चापि तेन तृष्णा प्रशाम्यति ॥ अरूक्षदुर्बलानांत
र्षं शामयेत्तूर्णामाशुपयः ॥२८॥ छागो वा घृतमिष्टः शीतो मधुरो रसो हृद्यः ॥ स्निग्धेन्ने भुक्तेयात्तृष्णा
स्यात्तां गुडांबुना शामयेत ॥२९॥ तर्षे मूर्च्छा निहत्तस्य रक्तपित्तापहैर्हन्यात् ॥ वटस्तुंगासिताल्लोध्रंदा
डिमं मधुकं मधु ॥३०॥ पिबेत्तंदुलतोयेन छर्दितृष्णानिवारणं ॥ तालुशोषे पिबेत्सर्पिर्घृतमैतेज्मथा

127

पिवा॥३१॥मूर्छाछर्दितृषादाहस्त्रीमद्यभृशकर्षिताः॥पिबेयुःशीतलंतोयंरक्तपित्तेमदात्यये॥३२॥धा
न्यम्लमास्यवैरस्यमुखादौर्गन्ध्यनाशनं॥तदेवालवणंशीतंमुखवैरस्यहरंपरं॥३३॥कोलदाडिमवृक्षा
म्लचीकाकीकाचुक्रिकारसः॥पंचाम्लकोमुखालेपःसद्यस्तृष्णांनियच्छति॥३४॥वटप्ररोहंमधुकुष्टमुत्प
लंसलाजचूर्णगुटिकांप्रकल्पयेत्॥सुसंमितांसावदनेनधारितांतृष्णांप्रवृद्धामपिहंतिसत्वरं॥३५॥
उदनंरक्तशालीनांशीतंमाक्षिकसंयुतं॥भोजयेत्तेनशाम्यंतिछर्दितृष्णाचिरोत्थिता॥३६॥छर्द्यस्रदाह
मूर्छातिमःक्लममदात्ययास्रविषपित्तेः॥शस्तस्त्वभावशीतंस्यात्तशीतंसन्निपातिनः॥३७॥हिक्काश्वास
नवज्वरपीनसकृतपार्श्वहृद्रोगे॥कफवातेत्वाचेज्ञातेसद्यमुद्ध्वचहितमुष्णं॥३८॥तदुदरपीनसमेहमं
दानिलाग्निगुल्मातिसारेषु॥प्लीह्निचतोयंनहितंवाममसह्येपिबेदल्पं॥३९॥पूर्वामयार्दितः
सन्नदीननृणांतृषार्दितोजलंकांक्षन्॥लभेतमरणमाश्वेवचाप्नुयाद्दीर्घरोगंच॥४०॥तृष्यन्पूर्वाम
यक्षीणोनलभेतजलंयदि॥मरणंदीर्घरोगंवाप्राप्नुयादरतिनरः॥४१॥तस्माद्दद्यात्तंबुपिवेत्तृष्णारोगी
सन्नार्थेराक्षौद्रं॥यद्यानस्यानघसाम्यंरोगस्यनश्रेष्ठं॥४२॥सात्म्यान्नपानभैषज्यैस्तृष्णांतस्यजये

सुनः॥ तस्यां जितायामन्यापि व्याधिः शाम्यश्चिकित्सितु॥४२॥ तस्यां निवृत्तायां तज्जोन्युउपद्रवः सुखं जे तु॥ तस्मात्सर्वं तच्छां जयेद्बहुभ्यो पि रोगेभ्यः॥४३॥ शोषांगसादबाधिर्यः संमोहभ्रमहृद्रदः॥ तच्छाया निग्रहात्तत्र शीतः सर्वो विधिर्हितः॥४४॥ तृषितो मोहमायाति मोहात्प्राणं विमुंचति॥ तस्मात्सर्वस्ववस्थासु नक्वचिद्वारि वार्यते॥४५॥ ॥इति वृंदे तृष्णाधिकारे षोडशोध्यायः॥ ॥अथ मूर्छाचिकित्सितं व्याख्यास्यामः॥ ॥सेकावगाहो मणयः सहाराः शीताः प्रदेहा व्यजनानिलाश्च॥ शीतानि पानानि च गंधवंति सर्वासु मूर्छास्वनिवारितानि॥४६॥ सिद्धानि सर्पिर्मधुरैः पथ्यां सिसदाडिमाजांगलजारसाश्च॥ तथा यवा लोहितशालयश्च मूर्छासु पथ्याश्च सदा तनोः॥४८॥ यथा दोषं कषायाणि ज्वरघ्नानि प्रयोजयेत्॥ रक्तजायां तु मूर्छायां हितः शीतक्रियाविधिः॥४९॥ मद्यजायां वमेन्मद्यं निद्रां सेवेद्यथा सुखं॥ विषजायां विषघ्नानि भेषजानि प्रयोजयेत्॥५०॥ कोलमज्जोषणोशीरकेसरं शीतवारिणा॥ पीतं मूर्छां जयेल्लीढा कृष्णा वा मधुसंयुता॥५१॥ महौषधामृताद्राक्षा पौष्करग्रंथिकोद्भवं॥ पिबेत्कणायुतं क्वाथं मूर्छायां च मदात्यये॥५२॥ पिबेद्दुरालभाक्वाथं सघृतं भ्रमशांतये॥ त्रिफलायाः

॥६३॥

॥६८

२

129

प्रयोगोवाप्रयोगैःपयसोऽपिवा॥५३॥ रसायनानांकौंभस्यसर्प्पिषोवाप्रयुज्यते॥ समूर्छितानिती
क्ष्णानिमद्यानिविविधानिच॥५४॥ प्रभूतकटुतिक्तानितस्यास्येगालयेन्मुहुः॥ मातुलुंगरसंतद्वत्
महौषधसमायुतं॥५५॥ तद्वत्सौवर्च्चलंदध्यायुक्तंमद्याम्लकांजिकैः॥ हिंगूषणसमायुक्तंयवास्संज्ञा
प्रबोधनाः॥५६॥ स्निग्धमामलकंपिष्ट्वाद्राक्षयासहसंसृजेत्॥ विश्वभेषजसंयुक्तंमधुनासहलेपये
त्॥५७॥ तेनास्यशाम्यतेमूर्छाकासश्वासस्तथैवच॥ पथ्याक्वाथेनसंसिद्धंघृतंधात्रीरसेनवा॥५८॥
सर्प्पिःकल्याणकंचापिमदमूर्छापहंपिबेत्॥ अंजनान्यवपीडाश्चधूमाःप्रधमनानिच॥५९॥ सूचीभि
स्तोदनंशस्तंदाहपीडानखांतरे॥ सूचीभिस्तोदनंशस्त्रैर्वहिःपीडानखांतरे॥६०॥ लुंचनंकेशलोम्नांच
दंतैर्दशनमेववा॥ आसृगुसावघर्षश्चहितास्तस्यावबोधने॥६१॥ ॥इतिमूर्छाधिकारेसप्तदशो
ध्यायः॥ ॥अथपानात्ययादिचिकित्सितंव्याख्यास्यामः॥ ॥नव्यखर्जुरमृद्वीकापरूषकरसैर्युतं॥
सदाडिमरसंपीतंसक्तुभिश्चावचूर्णितं॥६२॥ सशर्करंवामृद्वीकांमाद्वीकंचतथापरं॥ दद्याद्बहूदकंका
लेपानंपित्तमदत्यये॥६३॥ मंथखर्जुरमृद्वीकावृक्षाम्लाम्लीकदाडिमैः॥ परूषकैःसामलकैर्युक्तोमद्य

१९

चिकित्सारसुत॥६४॥सतीनमिश्रमुद्गांश्चदाडिमामलकान्विता॥द्राक्षामलकखर्जूरपरूषकरसेनवा॥६५॥
कल्पयेत्तर्पणंयूषान्रसांश्चविविधान्भिषक्॥दुःस्पर्शकेनमुस्तेनमुस्तपर्प्पटकेनवा॥६६॥जलमुस्त
तंवापदद्याद्दोषविपाचनं॥एतदेवचपानीयंसर्वत्रापिमदात्यये॥६७॥निरन्नयंपीयमानंपिपासाज्व
रनाशनं॥कर्कंधुबदरंप्रस्थंद्विगुणेनःपरिस्रुतं॥६८॥सिताचतुःपलंयुक्त्यात्सगेलामरिचार्द्धकं॥मस्तक
ग्रारुचिछर्द्दिस्त्रक्छ्वासदाहातिसारजित्॥६९॥एतत्पानात्ययंहंतिजाफलपलसुगंधिकं॥सौवर्चलमजाजि
श्चवृक्षाम्लंचाम्लवेतसं॥७०॥सगेलामरिचार्द्धांशंशर्कराभागयोजितं॥एतल्लवणमष्टांगमग्निसंदीप
नंपरं॥७१॥मदात्ययेकफप्रायेदद्यात्स्रोतोविशोधनं॥चव्यंसौवर्चलंहिंगुपुरकंविश्वभेषजं॥७२॥चू
र्णमद्येनपातव्यंपानात्ययरुजापहं॥मद्यंसौवर्च्चलव्योषयुक्तंकिंचिज्जलान्वितं॥७३॥जीर्णमिध्वाज्यदा
तव्यंमद्यपानात्ययापहं॥शुक्तंसौवर्च्चलीसंगित्र्यूषणाजकदीप्यकैः॥७४॥मद्यंपीत्वाजयत्युग्रंपवनो
त्थंमदात्ययं॥शतावरीसवश्वीनपृष्टीवल्कोत्सृजंपयः॥७५॥पयःपुनर्नवाक्वाथःयष्टीवल्कप्रसाधि
तं॥घृतंपुष्टीकरंपानान्मदात्ययहतौजसः॥७६॥ ॥इतिवंदोपानात्ययाधिकारोनामाष्टदशोध्यायः॥

॥६५॥ ॥६

अथ दाहचिकित्सितं व्याख्यास्यामः ॥ ॥ फलिनीलोध्रसेव्याम्बुहेमपत्रकुटन्नटं ॥ कोलीयकरसोपेतं दाहे शस्तं
लेपनं ॥ ७७ ॥ शतधौतघृताभ्यक्तं देहं द्रावयशक्तुभिः ॥ कोलामलकसंयुक्तैर्धान्याम्लैः पूरेद्बुद्धिमान् ॥ ७८ ॥
छादयेत्तस्य सर्वांगमारनालार्द्रवाससा ॥ लामज्जनाथशुक्लेन चंदनेनानुलेपयेत् ॥ चंदनाबुकणास्यंदि
तालवृंतोपवीजितं ॥ सुप्यादाहार्त्तितोंभोदकदलीदलसंस्तरे ॥ ८० ॥ परिषेकावगाहेषु व्यंजनानां च से
वने ॥ सस्यते शिशिरं तोयं तृष्णादाहोपशांतये ॥ ८१ ॥ क्षीरिः क्षीरकषायैश्च सुशीतैश्चंदनान्वितैः ॥ अं
तर्दाहं प्रशमयेद्रात्रिस्थान्यैः सुशीतलैः ॥ ८२ ॥ कुशादेः शालिपर्णी जीवकाद्यैन साधितं ॥ तैलं घृतं वा
दाहघ्नं वातपित्तविनाशनं ॥ ८३ ॥ ॥ कुशाद्यं तैलं ॥ ॥ पित्तहरं ज्वरघ्नं यत्तद्दाहे सर्वमिष्यते ॥ तैलं घृतं वा
दाहघ्नं वातपित्तविनाशनं ॥ अम्लपिष्टैः सुशीतैर्वा पलाशतरुजैर्दिहेत् ॥ ८४ ॥ बदरीपल्लवोत्थेन फेनेन
नारिष्टकस्य वा ॥ सुरामंडांबदध्यम्लमातुलिंगरसो मधु ॥ ८५ ॥ सेकप्रदेहे शस्यते दाहघ्नाः साम्लकांजिकाः ॥
हीवेरपद्मकोशीरचंदनांभोदवारिणा ॥ ८६ ॥ संपूर्णामवगाहेत द्रोणीं दाहार्दितो नरः ॥ शीतानि चान्न
पानानि शीतशय्यासनानि च ॥ ८७ ॥ शीतवातजलस्पर्शाच्छीतान्युपवनानि च ॥ वाद्यः कमलहासिनोज

लयंत्रग्रहाः श्रुताः ॥८८॥ नार्थ्यश्चंदनदिग्धांगाः दाहदैन्यहरा मताः ॥ श्लक्ष्णाश्लक्ष्णाधनालेपश्चंदनस्या
पि दाहनुत् ॥८९॥ ॥ इति यं दे दाहाधिकारो नाम विनविंशतितमोऽध्यायः ॥ ॥ अथोन्मादचिकित्सं व्याख्या
मः ॥ ॥ वातिके स्नेहपानं प्राक् विरेकः पित्तसंभवे ॥ कफजे वमनं कार्यं परे वस्त्यादिकं क्रमं ॥९०॥ यच्चो
पदेक्षते किंचिद पस्मारं चिकित्सिते ॥ उन्मादे न च कर्तव्यं सामान्याद्दोषदूष्ययोः ॥९१॥ ब्राह्मीकूष्मांडी
फल षड्ग्रंथा शंखपुष्पिका सरसा ॥ उन्माद हृतो वृष्यः पथ्यगेताः कुष्टमधुमिश्राः ॥९२॥ दशमूलांबु

पं

सघृतं युक्तमांसरसेन वा ॥ ससिद्धार्थचूर्णं वाक्वलं नावनं घृतं ॥९३॥ उन्मादशांतये पेयो रसो वार्तलत्रा
षजः ॥ प्रयोज्यं सार्षपं तैलं नस्याभ्यंजनयोः सदा ॥९४॥ स्नेहादिना क्रमेणादातुन्मादिनमुपाचरेत् ॥ व

॥६६॥

स्तिभिः स्नैहिकैर्नस्यैर्निरूहैः श्वेदनांजनैः ॥९५॥ त्र्यूषणं हिंगुलवणं वचा कटुकरोहिणी ॥ शिरीषनक्त ॥६

मालानां बीजं श्वेताश्च सर्षपाः ॥९६॥ गोमूत्रपिष्टैरेतैस्तु वर्त्तिर्नेत्रांजने हिता ॥ स्वचतुर्थकमपस्मारमुन्मा
दं च नियच्छति ॥९७॥ त्र्यूषणाद्या च वर्त्तिः शिरीषलशुनं हिंगुनागरं मधुकं वचा ॥ कुष्टं च बस्तमूत्रेण पिष्टं
स्यान्नावनांजनं ॥९८॥ तद्वद्घोषं हरिद्रे द्वे मंजिष्टा गौरसर्षपाः ॥ शिरीषबीजं चोन्मादग्रहापस्मारना

शानं॥९८॥सिद्धार्थकवचाहिंगुकरंजोदेवदारुच॥मंजिष्ठात्रिफलाश्वेताकरंजीत्वक्कटुत्रिकं॥१५०॥
समांशं॥निप्रियंगुश्चशिरीषोरजनीद्वयं॥बस्तमूत्रेणपिष्टोयमगदःपानमंजनं॥१॥नस्यमालेप
नंचैवस्नानमुद्वर्त्तनंतथा॥अपस्मारविषोन्मादकृत्सालक्ष्मीज्वरापहः॥२॥भूतेभ्यश्चभयंहंतिरा
जद्वारेचशस्यते॥सर्प्पिरेतेनसिद्धंवासमूत्रंवतदर्थकृत्॥३॥आश्वासयेत्सुहृद्वाक्यैःस्तद्धर्मार्थस्य
ना५ संहितैः॥ब्रूयादिष्टविनाशंवादर्शयेदद्भुतानिच॥४॥बद्धंसर्षपतैलाक्तमुत्तानंचातपेन्यसेत्॥कपिक
सां६ च्छ्वाथवातप्तैर्लोहतैलजलैःस्पृशेत्॥५॥कशाडयेद्वद्धंविजनेनिगडैर्गृहे॥रुध्यावेत्तोहिचित्तानंतथा वी५
व्रजतितत्सुखं॥६॥सर्प्पेणोद्धृतदंष्ट्रेणदंतैःसिंहैःगजैश्चतं॥त्रासयेच्छस्त्रहस्तैश्चौरात्रुभिस्तस्करैस्त
था॥७॥अथवाराजपुरुषाबहिर्नीत्वासुसंयुतं॥त्रासयेयुर्वधेनैनंतर्जयंतोनृपाज्ञया॥८॥देहदुःख
नयेन्योपिपरंप्राणभयंमतं॥तेनयातिशमंतस्यसर्वतोविप्लुतंमनः॥९॥इष्टद्रव्यविनाशात्तुमनो
यस्योपहन्यते॥तस्यतस्यद्वत्राश्वासैःसांत्वाश्वासैःशमंनयेत्॥१०॥गंडैर्विनीतेरुग्रैःविषैश्चापि
विपीड्येत्॥वक्रापिधानेकूपेवासनंतंचनिवासयेत्॥११॥सततंधूमयेच्चैनंगोमांसैश्चापिप

तिभिः॥ कामशोकभयक्रोधहर्षेर्ष्यालोभसंभवान्॥१२॥ परस्परप्रतिद्वंद्वैरेभिरेव शमं नयेत्॥ द
ष्ट्वा दोषच्चयः सात्म्यं देशकालबलाबलं॥१३॥ चिकित्सितमिदं कुर्यात् उन्मादे दोषभूतजे॥ देवर्षिपि
तृगंधर्वैस्तन्मत्तस्य तु बुद्धिमान्॥१४॥ वर्जयेदंजनादीनि तीक्ष्णानि क्रूरकर्मच॥ सर्पिःपानादि
रोगांगे मंत्रादिश्च वेष्यते विधिः॥१५॥ पूजाबल्युपहारेष्टिहोममंत्रांजनादिभिः॥ जयेदागंतुमुन्मादं यथा
विधिशुचिर्भिषक्॥१६॥ कल्याणकं प्रयुंजीत महाद्वा वेनसंघृतं॥ तैल्वनारायणं चापि महन्नारायणं त
था॥१७॥ जटिलीपूतनाकेशीचारटीमर्कटीवरी॥ त्रायमाणाजयावीराचोरकः कटुरोहिणि॥१८॥
कायस्थाश्वकरी छत्रासातिछत्रापलंकषा॥ महापुरुषदंताच वयस्थानाकुलीद्वयं॥१९॥ कटंभ
राचक्रश्विकाली स्थिराचेव च तैर्घृतं॥ पंचमूलाचक्राश्मर्यारास्नैरंडत्वद्बलं॥२०॥ मूर्वाशतावरीचे
तिकाथैर्द्विपलिकैरिमैः॥ कल्याणस्यचांगेन चैतसं नाम तद्घृतं॥२१॥ सर्वचेतोविकाराणां शमनं प
रमं स्मृतं॥ कार्यःकषायोद्विगुणेनतोयैः पानीयकल्याणककल्कपादः॥२२॥ हिंगुसौवर्चलव्योषै
र्द्विपलांशोर्धजाढकं॥ चतुर्गुणे गवां मूत्रे सिद्धमुन्मादनाशनं॥२३॥ हिंगुना हिंगुपर्ण्या वा कायस्था

शनं॥९८॥सिद्धार्थकवचाहिंगुकरंजोदेवदारुच॥मंजिष्टात्रिफलाश्वेताकरंजीत्वक्कटुत्रिकं॥१५०॥
समांशं॥निप्रियंगुश्चशिरीषोरजनीद्वयं॥वस्तमूत्रेणपिष्टोयमगदःपानमंजनं॥१॥नस्यमालेप
नंचैवस्नानमुद्वर्तनंतथा॥अपस्मारविषोन्मादकृत्यालक्ष्मीज्वरापहः॥२॥भूतेभ्यश्चभयंहंतिरा
जद्वारेचशस्यते॥सर्पिरेतेनसिद्धंवासमूत्रंवतदर्थकृत्॥३॥आश्वासयेत्सुहृद्वाक्यैःस्तधर्मार्थस्य
संहितैः॥ब्रूयादिष्टविनाशंवादर्शयेदद्भुतानिच॥४॥बद्धसर्षपतैलाक्तमुत्तानंचातपेन्यसेत्॥कपिक
च्छ्वाथवातप्तैर्लोहितैलजलैःस्पृशेत्॥५॥कशाभिस्ताडयेद्वद्धंविजनेनिगडैर्गृहे॥रूक्षावेतोहिविज्ञानंतया
व्रजतितत्सुखं॥६॥सर्पेणोद्धृतदंष्ट्रेणदंतैःसिंहैःगजैश्चतं॥त्रासयेच्छस्त्रहस्तैश्चौरात्रुभिस्तस्करैस्तत
था॥७॥अथवाराजपुरुषाबहिर्नीत्वासुसंयुतं॥त्रासयेयुर्वधेरनंतर्जयंतोनृपाज्ञया॥८॥देहदुःख
नयेन्योपिपरंप्राणभयंमतं॥तेनयातिशमंतस्यसर्वतोविप्लुतंमनः॥९॥इष्टद्रव्यविनाशाच्चमनो
यस्योपहन्यते॥तस्यतस्यहृदशाश्वासैःसांत्वयाश्वासैःशमंनयेत्॥१०॥गंडैर्विनीतैरुरगैःविषैश्चापि
विपीड्येत्॥वक्रापिधानेकूपेवासननंतंचनिवासयेत्॥११॥सततंधूमयेच्चैनंगोमांसैश्चापिप

सचयस्छया॥ सिद्धं सर्प्पिर्हितं तं निसंकायस्थाहिंगुश्चोरकैः॥२३॥ केवलं सिद्धमंभोभिः पुराणं पाययेत्
स्थितं॥ पाययित्वा क्रमांमात्रां भक्त्रेत्रं ध्याद्रहे पिबा॥२५॥ विशालात्रिफलाक्रांतीदेवदार्वेलवालुकं॥ स्थि
रानंताहरिद्रेद्वे सारिवेद्वे प्रियंगुकं॥२६॥ नीलोत्पलं चमंजिष्टादंतीदाडिमकेसरं॥ विडंगंप
ृश्निपर्णिच कुष्टं चंदन पद्मकं॥२७॥ तालीसपत्रं बृहती मालत्याः कुसुमं नवं॥ एतैः कर्षसमैः कल्कैः
विंशत्यष्टभिरेव च॥२८॥ चतुर्गुणं जलं दत्वा घृतंप्रस्थ विपाचयेत्॥ अपस्मारेज्वरे कासे शोषमंदा
स नलेक्षये॥२९॥ वातरक्ते प्रतिस्याये तृतीयकचतुर्थके॥ छर्द्यर्शोमूत्रकृच्छ्रे च विसर्पोपहतेषु च॥३०॥
कंडूपांडुामयोन्मादविषमेहगरेषु च॥ भूतोपहतचित्तानां गद्गदानामरेतसां॥३१॥ शस्तं स्त्रीणां कै
च वंध्यानां धन्यमायुर्बलप्रदं॥ अलक्ष्मीपापरोगघ्नं सर्वग्रहनिवारणं॥३२॥ कल्याणकमिदं सर्प्पिः
श्रेष्टं पुंसवनेषु च॥ एभ्य एव स्थिरादीनि जले पक्त्वा विंशति॥३३॥ नारसे तस्मिन्पचेत्सर्प्पिर्द्विष्टि क्षीर
चतुर्गुणं॥ वीरर्द्धिमाषकाकोलीस्वयंगुप्तर्षभर्द्धिभिः॥३४॥ मेदया च समैः कल्कैस्तस्मात्कल्याणकं म
हत्॥ बृंहणीयं विशेषेण सन्निपातहरं परं॥३६॥ ॥इति चं देउन्मादाधिकारो नामविंशतितमोऽध्यायः॥

॥ ॥अथापस्मारचिकित्सितं व्याख्यास्यामः॥ ॥वातिकं बस्तिभिः प्रायः पित्तं प्रायो विरेचनैः॥ कफजं
वमनप्रायैरपस्मारमुपाचरेत्॥२७॥ ततस्तीक्ष्णं प्रयुंजीत भिषक्नस्यप्रबोधनं॥ सर्वतःशुद्धदेहस्य
प्रादुर्भावे हरिक्रीयो॥२८॥ मनोह्वतार्क्ष्यजं चैव सकृच्चाय पतस्यत॥ अंजनं हंत्यपस्मारं उन्मादं च विशे
षतः॥२९॥ यष्टिहिंगुवचावज्रशिरीषलशुनामयैः॥ साजमूत्रैरपस्मारसोन्मादे नावनांजनं॥३०॥ कु
पिथ्थान् शारदान् मुद्गान् मुस्तोशीरयवांस्तथा॥ सव्योषान् बस्तमूत्रेण पिष्ट्वा बस्तिं प्रकल्पयेत्॥३१॥
अपस्मारं तथोन्मादं सर्पदष्टं गरार्दितं॥ विषपीतं जलमृतं चैतास्युरमृतोपमा॥३२॥ पुष्योद्धृतं शु
नःपित्तमपस्मारघ्नमंजनं॥ तदेव सर्पिषा युक्तं धूपनं परमं स्मृतं॥३३॥ हत्वंपोक्षिरूजो यस्य श्वे
दोहस्तादिशीतलं॥ दन्ताम्लजलं तस्य कल्याणार्थं प्रयोजयेत्॥३४॥ सणत्वदयोरंड दन्ताम्लीशता
वरी॥ रास्ना मागधिका शिग्रुक्काथं द्विपलिकं नवेत्॥३५॥ विदारीमधुकं मेदे काकोल्यौ सिता तथा॥
एभिः खर्जुरमृद्वीकाभीरुमुंजातगोक्षुरैः॥ वेतसस्य घृतस्यांगेः पक्वं व्यंमधुमुनमं॥ महावेतेसस्सं
तु महापस्मारनाशनं॥३६॥ गदोन्मादप्रतिश्यायतृतीयकचतुर्थकं॥ पापालक्ष्मीजयत्याशु सर्वग्रहवि

॥६८॥

१८

॥६८॥

वं २

नाशनं ॥ ३७ ॥ कासश्वासहरश्चैव शुक्रावर्च्चविशोधनं ॥ ॥ महावेन संघृतं ॥ ॥ द्रव्यमाषोत्थितं क्वाथं
दशांशे शिष्टं जलं ॥ पादशेषं प्रकर्त्तव्यं मेकैकं क्वाथविधिः स्मृतः ॥ ३९ ॥ ब्राह्मीरसेव चा कुष्ठशंखपुष्प
व्यौभि रेवच ॥ पुराणं हरत्यपस्मारं सोन्मादग्रहनाशनं ॥ ४० ॥ गोशकृद्रसदध्यम्लक्षीरमूत्रैः समैर्घृतं ॥
सिद्धं पिबेदपस्मारकामलाज्वरनाशनं ॥ ४१ ॥ ॥ स्वल्पपंचगव्यघृतं ॥ ॥ श्वसृगालविडालानां कु
पिलानां गवामपि ॥ पित्तानि मस्तुनो दद्यादपस्मारनिवृत्तये ॥ ४२ ॥ नकुलोलूकमार्जारगृध्रकी
टाहिकाकजैः ॥ तुंडपक्षैः पुरीषैश्च धूपनं कारयेद्भिषक् ॥ ४३ ॥ गोमूत्रसिद्धार्थकशिग्रुकल्कैरुद्वर्त
नं तैरथवा प्रलेपः ॥ पूतिश्च गोमत्स्यकृतोऽत्र धूपो नस्यं च तीक्ष्णैरथ बोधनार्थं ॥ ४४ ॥ अपेतराक्षसी
कुष्ठपूतनाकेशिचोरकैः ॥ उत्सादनं स्याद्गोमूत्रैस्तैश्च क्वाथैः सेचयेत् ॥ ४५ ॥ द्विपंचमूलीत्रिफलारजन्यैः कु
टजस्त्वच ॥ सप्तपर्णमपामार्गनीलिनीकटुरोहिणी ॥ ४६ ॥ शम्याकं पंचकोलं च पौष्करं सदुरालभं ॥
द्विपलानि जलद्रोणे पचेत्पादावशेषितं ॥ ४७ ॥ भार्गीपानत्रिकटुकं त्रिवृच्चानिचुलानि च ॥ श्रेयसी
मार्करं कं स्वर्वादंती भूनिंबचित्रकैः ॥ ४८ ॥ द्वे सारिवे रोहिषं च भूतिकं मदयंतिकां ॥ क्षिपेत्सिद्धाक्ष

कू ५

च

गो १

मात्राणिते: प्रस्थं सर्प्पिषः पचेत् ॥४९॥ कोशालदसदध्यम्लक्षीरमूत्रैश्चतत्समैः ॥ पंचगव्यमितिख्या
तंमहत्तदमृतोपमं ॥५०॥ अपस्मारे ज्वरे कासे श्वयथावुदरेषु च ॥ गुल्मार्शः पांडुरोगेषु कामलायां हली
मके ॥५१॥ अलक्ष्मीग्रहरोगघ्नं चातुर्थकनिवारणं ॥ शंखपुष्पीवचाकुष्ठैः सिद्धं ब्राह्मीरसे घृतं ॥५२॥
पुराणं हंत्यपस्मारं सोन्मादग्रहनाशनं ॥ वचाशम्याककैडर्यसप्तच्छाहिंगुचोरकैः ॥५३॥ सिद्धं पलंक
षायुक्ते वातश्लेष्मात्मके घृतं ॥ तैलप्रस्थं घृतप्रस्थं जीवनीयैः पलोन्मितैः ॥५४॥ क्षीरद्रोणे पचेत्सि
द्धमपस्मारविमोक्षणं ॥ कासक्षीरेक्षुरसयोः काश्मर्यं षड्गुणे रसे ॥५५ कार्षिकैर्जीवनीयैश्च सर्प्पिःप्रस्थं
विपाचयेत् ॥ वातपित्तोद्भवं क्षिप्रमपस्मारं नियच्छति ॥५६॥ तद्वत्कासविदारीक्षुकुशाः क्वाथेश्रतंप
यः ॥ मधुकस्य पलेकल्के द्रोणं वामलकीरसात् ॥५७॥ तद्वत्सिद्धो घृतः प्रस्थः पित्तापस्मारभेषजं ॥ कू
कुष्मांडकरसे सर्पिरष्टादशगुणे पचेत् ॥५८॥ यष्ट्याह्वकल्कं च तत्पानं अपस्मारहरं परं ॥ घृतं सैंध
वहिंगुन्याकर्षिबस्तस्य चतुर्गुणे ॥५९॥ मूत्रसिद्धमपस्मारहृद्रोगोन्मादनाशनं ॥ अभ्यंगः सार्षपं
तैलं बस्तमूत्रे चतुर्गुणं ॥६०॥ सिद्धं स्यात्कासवन्मूत्रे स्नानोत्सादनमेव च ॥ कटुभीनींबकद्वंगम

बय
॥६४॥
॥६९

धुशिग्रुत्वचां रसे ॥६१॥ सिद्धमूत्र समं तैलं अभ्यंगार्थे प्रशस्यते ॥ त्रिफलाव्योषपीतद्रुमयवक्षारफ
णिज्जकैः ॥६३॥ श्यामापामार्गकारंजगजमूत्रे च वस्तजे ॥ साधितं नावनं तैलं मपस्मृति विनाशनं ॥६२॥
यः स्वादे क्षिरसम्पिनं माक्षिकेन च चारजः ॥ अपस्मारं महाघोरं सुचिरोत्थं जयेद्द्रुतं ॥६४॥ ॥इतिवृंद
अपस्माराधिकारोनामैकविंशोध्यायः॥ ॥अथ वातव्याधिचिकित्सितं व्याख्यास्यामः॥ ॥अभ्यं
गः स्वेदनं वस्ति नस्यं स्नेहविरेचनं ॥ स्निग्धाम्ललवणस्वादुवृष्यं वातामयापहं ॥६५॥ वाजिगंधाबल

स६ स्तिस्त्रो दशमूली महौषधं ॥ गध्रनख्यौ रास्नाच गणो मारुतनाशनः ॥६६॥ पिबेत्पिबेदेरंडतैलं वाच

स्ति कुक्षीगदाश्रिते ॥ दशमूलीकषायेण मातुलिंगरसेन वा ॥६७॥ पंचमूलीशृतं पंचाम्लीरस एव च ॥ क्षीरं ५
सुस्निग्धो धान्ययूषो वा वातघ्नो भोजने हितः ॥६८॥ पंचमूलीबालसिद्धं क्षीरं वातामये हितं ॥ पटोल
फलकैर्यूषो वृष्यो वातहरो लघुः ॥६९॥ बाधालकरूता यूषपरं वातविनाशनः ॥ शीतोष्णस्निग्धरू
क्षाद्यैर्वातजो यो न शाम्यति ॥७०॥ क्रियारस्तत्र विज्ञेयो दुष्टमेवातिशोणितं ॥ अनूपमत्स्यामिषवेशवा
रे रूक्षैः प्रदेहः पवनापहः स्यात् ॥ स्नेहैश्चतुर्भिर्दशमूलसिद्धैर्गंधौषधैश्चानिलहः प्रदेहः ॥ निरा

स्थिपिष्टां तपिष्टं स्विन्नं घृतगुडान्वितं ॥७२॥ कूष्माण्डमिरिचसंयुक्तं वेशवारइति स्मृतः ॥७३॥ सुखोष्णः सा
स्थि पिष्टां तपिष्टं स्विन्नं घृतगुडान्वितं ॥७२॥ कूष्माण्डमिरिचसंयुक्तं वेशवारइति स्मृतः ॥७३॥ सुखोष्णः सा
म्ललवणः सोल्वणः परिकीर्त्तितः ॥ तेनोपनाहं कुर्वीत सर्वदा वातरोगिणां ॥७४॥ कोलं कुलत्थं सुरदारु
रास्नामाषउमातैलफलानि कुष्टं ॥ वचाशताह्वायवचूर्णमम्लमुष्णानि वातामयिनां प्रदेहः ॥७५॥ सर्वस्ने
काकोल्यादिगणो ग्राह्यो अष्टवर्गयुसंज्ञिकः ॥ वातघ्नो भद्रदार्वादिवर्गोम्लादाडिमादिकः ॥७६॥ सर्वस्ने
हश्चतुस्नेहो लवणं सैंधवादिकं ॥ अम्लादिमिश्रसंस्कार्यं काकोल्यादित्रयं त्रिभिः ॥७७॥ आमाशयगते वा
तेच्छर्दितानां यथाक्रमं ॥ देयः षड्धरणो योगः ससरात्रं तु षांबुना ॥७८॥ चित्रकेंद्रयवाः पाठाकटुकातिवि
षाभया ॥ महाव्याधिप्रशमनो योगः षड्धरणः स्मृतः ॥७९॥ कर्षोष्टदशनिष्पावैः धरणस्यापि केस्तुनैः ॥
तेन षड्धरणो योगः ससरात्रं सुखांबुना ॥८०॥ पक्वाशयगते वाते हितं स्नेहविरेचनं ॥ वस्तयः शोधनी
याश्च प्रशस्ताश्च लवणोत्तराः ॥८१॥ कार्यो बस्तिगतो वापि विधिर्बस्तिविशोधनः ॥ श्रोत्रादिषु प्रकुपिते
कार्यश्चानिलहाक्रमः ॥८२॥ स्नेहाभ्यंगोपनाहाश्च मर्दनालेपनानि च ॥ त्वग्मांसासृक् शिराप्राप्ते कुर्याच्चा
सृग्विमोक्षणं ॥८३॥ स्वेदोपनाहोऽग्निकर्म बंधनोन्मर्दनानि च ॥ स्नायुसंध्यस्थिसंप्राप्ते कुर्याद्वाते वि

॥८०॥

॥८०॥

चक्षणः ॥८५॥ निगुडोस्थिगतो वायो पाणिमंथेन दारीते ॥ नाडिंदंता सिद्धनिंबिषकं चूषयेत्सबनं बली ॥८६॥
शुक्रप्रासे निलेकार्यं शुक्रदोषचिकित्सिते ॥ वक्षस्त्रिकः संधिगतं वायुमन्यागतं तथा ॥८७॥ माषवलाश्व
कश्चैव तृणरास्नाश्वगंधोरुबूकाणां ॥ काथो नस्यति पीतो रामठलवणान्वितः कोष्णः ॥८८॥ अपहरति प
क्षघातं मन्यास्तंभं कर्णनादरुजं ॥ दुर्जयमर्दितवातं सप्ताहाज्जयति चावश्यं ॥८९॥ माक्षिकं हिंगु सिंधूत्थ
जीरणघास्तकणिकाः ॥ मंषाश्च गुल्म एरंडवायाक्ष कसतं पिबेत् ॥९०॥ हिंगुसैंधवसंयुक्तं पक्षाघा
ननिवारणं ॥ माषपिष्टघृतं युक्तानवनीतेन सोर्दिती ॥९१॥ क्षीरमांसरसे युक्तं दशमूलरसं पिबेत् ॥
दशमूलीबलामाषकाथस्तैलाज्यमिश्रितः ॥९२॥ सायं भुक्ता पिबेन्नस्ये त्विश्वाच्यामवबाहुके ॥ पलम
र्धपलं वापिरसोनस्य सुकुर्दितं ॥९३॥ हिंगुजीरकसिंधूत्थसौवर्चलकटुत्रयैः ॥ चूर्णितैर्माषकोन्मा
नैरक्तचूर्णप्रविलोडितं ॥९४॥ यथाग्निभक्षितं प्रातरंबुकाथोनुपानतः ॥ दिने दिने प्रयोक्तव्यं मासमेवं नि
रंतरं ॥९५॥ वातरोगान्निक्षिपत्यावार्दितं चापतानकं ॥ एकांतरोगिणे चैव तथा सर्वांगरोगिणे ॥९६॥ गुर
स्तं नेच गद्भ्रस्यां रूमि दोषविशेषतः ॥ स्नेहाभ्यंगशिरोबस्तिनस्यधूमपरायणः ॥९७॥ अर्दितं सज

॥८१॥

येत्सर्पिः पिबेदुत्तरभक्तिकं ॥ मूलं बाह्वायास्तथ पारिभद्रात थासगुसास्वरसं पिबेयः ॥ नस्यं पतयोर्मांसरसेन दध्यान्मासादसौ वज्रसमानबाहुः ॥ ॥ पंचमूलीरुतः क्वाथो दशमूलीकृतोथवा ॥ नस्ये दत्तथा नस्यं मन्यास्तंभे प्रशस्यते ॥ बाहुशोषे पिबेदुक्ताः सर्पिः कल्याणकं महत् ॥ १६० ॥ हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सरुक् ॥ क्रुद्धो वायुर्यदा कुर्यात्तदा तं कुब्जमादिशेत् ॥ १ ॥ वातघ्नैर्दशमूलस्याचनं कुब्जमुपाचरेत् ॥ स्नेहैर्मांसरसैर्वापि मज्जं वातं विवर्जयेत् ॥ २ ॥ पिप्पल्यादिरसस्तूनी प्रतीरून्याः सुखं वा पुनः ॥ पिबेद्वास्नेहलवणं सघृतं क्षीरहिंगुणा ॥ ३ ॥ आध्माने लंघनपाणितापश्चफलवर्त्तयः ॥ दहहेमवती कुष्ठनाम्नाह्वा हिंगुसैधवैः ॥ ४ ॥ अम्लपिष्टैः सुखोष्णैश्च प्रदिह्याद्दुदरं भिषक् ॥ दीपनं पाचनं चैव बस्तिश्चाप्यत्र शोधनः ॥ ५ ॥ प्रत्याध्माने तु वमनं लंघनं दीपनं तथा ॥ प्रत्याष्ठीलीकयोगुल्मान्यंत्तरविद्रधिः ॥ क्रियाहिंग्वादिकं चात्र शस्यते च विशेषतः ॥ विम्हत्स्यां खंजपंगौ च दाह हर्षे च पादयोः ॥ ७ ॥ क्रोष्टुशीर्षविकारेषु विकारे वातकंटके ॥ शिरां यथोक्ता निर्विध्य चिकित्सा वातरोगजित् ॥ ८ ॥ जिह्वास्तंभे क्रियाश्रेष्ठा सामान्योक्ता तथार्दिते ॥ शिरोग्रहे तु कर्त्तव्या शिरोरोगमरुत्क्रिया ॥ ९ ॥ सहरिद्रा वचा कुष्ठं

१०
॥८

पिप्पली विश्वभेषजं ॥ अजाजी चाजमोदं च यष्टीयेष्टीमधुकं समं धयैः ॥१०॥ एतानि समभागानि
सूक्ष्मचूर्णानि कारयेत् । तच्चूर्णं सर्पिषालोड्य भक्षयेन्नरः ॥११॥ एकविंशतिरात्रेण भवे
च्छ्रुतिधरो नरः ॥ मेघदुंदुभिनिर्घोषो मत्तकोकिलनिस्वनः ॥१२॥ जडगद्गदमूकत्वं लेहः कल्याणको
जयेत् ॥ सुखवानेत्रस कोष्ठ कुर्याश्च बहुशो भिषक् ॥१३॥ हिंग्वाद्यं लवणागारधूमैस्तैलसमायुतैः ॥
गुग्गुलं कोष्ठ शीर्षे च गडूची त्रिफलांभसा ॥१४॥ क्षीरैरैरंडतैलेन पिबेद्वा वरदारुकं ॥ बलाबिल्वस
तेक्षीरे घृतमंडं विपाचयेत् ॥१५॥ तस्य शुक्तिप्रकुंचं च नस्यं शीर्षगतेनिले ॥ श्यामायलं षाद्य वा
कार्ये वा वातरक्तवत् ॥१६॥ हतेरक्तेनिलहरो विधिः कृत्स्नः प्रशस्यते ॥ दशमूलाबलारास्नागुडूची
विश्वभेषजं ॥१७॥ पिबेदेरंडतैलेन गृध्रसीखंजपंगुषु ॥ विशोध्येरंडबीजानि पिष्ट्वा क्षीरेण पाच
येत् ॥१८॥ पायसं सकटीशूले गृध्रस्यां परमौषधं ॥ पंचमूलीकषायं तु रुबुतैलं तवश्चवं ॥१९॥
त्वचेनेवाथवा युक्तं गृध्रसीगुल्मशूलनुत् ॥१९॥ तैलं घृतं चार्द्रकमातुलुंग्याः रसं ससुयुक्तं सगुडं पि
बेद्वा ॥ कट्युरुपृष्ठत्रिकगुल्मशूलगृध्रस्युदावर्त्तहरं प्रतिष्टं ॥२०॥ गुडूच्यारग्वधं शुंठी गोरीधन्वय

द्वा ५

145

वासकैः॥२१॥कषायंपाययेद्धीमान्पिप्पलीलवणान्वितं॥कफवातामदोषघ्नंपाचनंवह्नीदीपनं॥२२॥
तैलमेरण्डजंवापिगोमूत्रेणपिबेन्नरः॥मासमेकंप्रयोगोयंगृध्रस्यूरुग्रहापहं॥२३॥वाजिगंधाबला
बिल्वदशाम्लस्यंबुसाधितं॥गृध्रस्यांतैलमैरंडंबस्तौपानेचशस्यते॥२४॥द्वेपलेसैंधवान्यंचसुंठ्याग्रं
थिकंचित्रकात्॥द्वेचभल्लातकास्थीनिविंशतिर्द्वेतथाढके॥२५॥आरनालात्स्वेदसेद्धंतैलस्यैतेरय
स्पदं॥गृध्रस्यूरुग्रहार्त्तानांसर्ववातविकारनुत्॥२६॥रास्नायास्तुपलंचैकंकर्षान्यंचगुग्गुलो॥सर्पि
षावटकीखादेद्गृध्रसीहरा॥२७॥सुंठीगंधर्वहस्ताभ्यांपिष्टाभ्यांचविपाचितं॥नक्षितंनाकुटी
श्रलंगृध्रसींहंत्यसंशयं॥२८॥नादौबस्तिविधिंकुर्यात्यावदूर्ध्वंनशुध्यति॥स्नेहानिरेचकास्तत्रनस्म ता॰

॥७२॥ न्यंबहुशोयथा॥२९॥गृध्रस्यार्त्तस्यजंघायास्तहस्वेदंकृतेन्नरं॥पद्भ्यांसंमर्दयांचसूक्ष्ममार्गेण ॥७२

गृध्रसीं॥३०॥अवतार्यांगुलैःसम्यक्कंनिशायंत्रानेरनैः॥ज्ञात्वासमुन्नतिंग्रंथिंकंडुरायांव्यवस्थि
तं॥३१॥तंशस्त्रेणविदार्याशुप्रवालांकुरसन्निभं॥समुद्धृत्याग्निनादग्ध्वालिंपेद्यष्टिचंदनैः॥३२॥
विध्येत्सिरामिंद्रयवस्तेरधस्तच्चतुरंगुले॥यदिनोपशमंगच्छेद्दहेत्पादकनिष्ठिकां॥३३॥रक्तावसे

पिबे=२

चनंकुर्याद्ग्नीक्ष्णंवातकंटके॥ पिबेदेरंडतैलंवा दहेत्सूचीभिरेववा॥३४॥ वायुःष्वधाश्रितः कुर्यात्सा
मोवाजनयेद्रुजः॥ कटीग्रहः सएवोक्तः पंगुः संधि हूयाश्रितः॥३५॥ दशमूलीकषायेणहितानगरांभसा॥
कटीशूलेषुसर्वेषु तैलमेरंडसंभवं॥३६॥ पथ्यारग्वधकम्पिल्लंत्रिफलापिप्पलीवासुचूर्णिता॥ दश
मूलांबुनाभाव्यंत्वगेलार्द्धपलान्विते॥३७॥ दशपलानि पंचैव गुग्गुलोर्वटीकाकृतः॥ एषांमांसरसः
स्यात्क्षावातरोगानशोषतः॥३८॥ हंतिसंध्यस्थिमज्जास्थान्वज्रमिंद्राशनिर्यथा॥ लेहयेद्विगुणोना
यमेले[illegible]वानयेत्॥३९॥ दशमूलांबुनाशोध्यः सप्तवारंतुगुग्गुलुः॥ ॥गुग्गुलुवटकाः॥
आभाश्वगंधाहपुष्पागुडूचीशतावरीगोक्षुरकंसरास्ना॥ शामाषटीघोषवतीयवानीसनागरा
चेतिसमेश्वचूर्णं॥ तुल्यं नवेल्लोशिशुमुत्रमध्ये देयंतथासर्पिरितोर्द्धभागः॥४१॥ अक्षार्द्धमात्रं
तुततः प्रयोगः कृत्वानुपानंसुरयाथयूषैः॥ मध्येनवाकोष्णजलेनवाथक्षीरेणवामांसरसेनवापि॥
॥४२॥ कटीग्रहेगृध्रसिबाहुपृष्टेहनुग्रहेजानुनिपादयुग्मे॥ संधिस्थितेवास्थिगतेचवायौमज्जा
श्रितेपायुगतेचदुष्टे॥४३॥ रोगाञ्जयेद्वातकफानुबद्धान्वातेरितान्हृद्ग्रहयोनिदोषान्॥ नग्ना

ते२

147

॥७२॥

स्थिविद्धेषु चरवं जवातेन योदशांगं प्रवदंति सिद्धाः॥४४॥ घोषवतीं रातपुष्पा त्रयोदशांगो गुग्गुलुः॥

दशमूलस्य निर्यूहे जीवनेयैः पलोन्मितैः॥४५॥ क्षीरेण च घृतं पक्वं तर्पणं भावनार्त्तिजित्॥ ॥दशमूलघृतं॥ ॥अश्वगंधाकषायेण कल्के क्षीरे चतुर्गुणं॥ घृतं पक्वं तु वातघ्नं वृष्यं मांसविवर्द्धनं॥४६॥

अश्वगंध घृतं॥ ॥आजं चर्म विनिर्मुक्तं त्यक्त्वा शृंगखुरादिकं॥ पंचमूलीद्वयं चैव जलद्रोणे विपाचयेत्॥४७॥ तेन पादावशेषेण घृतप्रस्थं विपाचयेत्॥ जीवनीयैः सयष्ट्याह्वैः क्षीरे चैव चतुर्गुणे॥

री॥४८॥ छागलाद्यमिदं नाम्ना सर्ववातविकारनुत्॥ अर्द्दिते कर्णमूले च बाधिर्ये मूकत्वकर्मणि॥ ॥४९॥ अङ्गभङ्गपंगुनां खंजगृध्रसिकुब्जयाः॥ अपतानापतंत्रेषु सर्प्पिरेतत्प्रशस्यते॥५०॥

द्वात्रिंशाच्च पलान्यत्र देयानि दशमूलतः॥ घृतैतैले च योगे च यद्द्रव्यं पुनरुच्यते॥५१॥ तत्रातव्य मिहायेण भागतो द्विगुणं भवेत्॥ छागलाद्यं घृतं॥ ॥चित्रकं नागरं रास्ना पोष्करं पिप्पली वटी॥ पि ष्ट्वा विपाचयेत्सर्पि वातरोगहरं परं॥५२॥ द्रोणेंभसः पचेद्भागान् दशमूली चतुःपलान्॥ यव कोलकु लत्थानां भागैः प्रस्थोन्मितैस्सदा॥५३॥ पादशेषे रसे पिष्टैर्जीवनीयैः सशर्करैः॥ नधारकर्जूरकारम

॥७२॥

148

र्द्राक्षाबदरफल्गुभिः॥५४॥ सक्षीरैः सर्प्पिषः प्रस्थः सिद्धः केवलवातनुत्॥ निरत्ययं प्रयोक्तव्यः पाना
भ्यंजनबस्तिषु॥५५॥ दशमूलीसद्राक्षीरजीवनीयैर्विपाचितं॥ तैलं हंत्यर्दितं नस्यपानाभ्यंगानुवासनैः
॥५६॥ रास्नासविश्वनिर्यूहे तैलं लवणपाचितं॥ गंधैर्हैमवतैः पिष्टैः रलाद्यैश्चानिलार्त्तिजित्॥५७॥
एकः कल्कश्च वल्लयोः प्रसारिण्यश्च गंधयोः॥ तैलं संकुचितेभ्यंगो माषसैंधवसाधितं॥५८॥ बाहु
शीर्षगते नस्यं पानं चोत्तरभक्तिकं॥ ग्रंथिकाग्निकणादारुरास्नाविश्वैः ससैंधवैः॥५९॥ माषक्वाथे
न तत्तैलं पक्षाघातविनाशनं॥ माषप्रस्थं समावाप्य पचेत्समगजलाढके॥६०॥ पादशेषे रसे तस्मिंसिमे
रंदद्याच्चतुर्गुणं॥ प्रस्थं चातिलतैलस्य कल्कान्दत्वाक्षसमितान्॥६१॥ जीवनीयान्यैषैशेशतपुष्पा
ससैंधवं॥ रास्नात्मगुप्तामधुकं कटुकं कुष्ठमेव च॥६२॥ पक्षघातेर्दिते वाते कर्णमूले च दारुणे॥
मंदश्रुतौ च श्रवणे त्रिमिरे च त्रिदोषजे॥६३॥ हस्तकंपे शिरःकंपे विश्वाच्यामवबाहुके॥ शस्तः क
लांगरवंजे च पानाभ्यंजनबस्तिषु॥६४॥ माषतैलमिदं श्रेष्ठमूर्द्ध्वजत्रुगदापहं॥ एलामूलैरासर
लशैलजदारुकौंतीचंडासठीनलदचंपकहेमपुष्पां॥ स्थौणेयगंधरसपूतिदलम्मणालीश्रीवा

षा ५

सकंदुरनखांबुवरांगकुष्टं ॥६५॥ कालीयकंजलदकर्कटचंदनश्रीजात्याफलंसविक्कसंसहकुंकुमं
च॥ स्यक्कानुरूक्कलधुलानतया॥ विनीयतैलंबलाक्वथनदुग्धयुतंचदध्ना॥६६॥ सार्द्धपचत्तुहितमे
तदुराहरंतिवातामयेषुबलवर्णवपुःप्रकारि॥६७॥ ॥एलाद्यंतैलं॥ ॥बलानिक्काथकल्काभ्यां
तैलंपक्कंपयोन्वितं॥ सर्ववातविकारघ्नमेवंशैलेयपाचितं॥६८॥ बलामूलकषायस्यदशमूली
कृतस्यच॥ यवकोलकुलत्थानांकाथस्यपयसस्तथा॥६९॥ अष्टावष्टौसुभागास्तैलादेकस्त
देकतः॥ पचेदावाप्यमधुरंगणंसैंधवसंयुतं॥७०॥ तथागरुंसर्जरसंसरलंदेवदारुच॥ मंजिष्टा
चंदनंकुष्टमेलाकालानुसारिवां॥७१॥ मांसीशैलेयकंपत्रंतगरंसारिवांवचा॥ शतावरीमश्व
गंधांशतपुष्पांपुनर्नवां॥७२॥ रूसाधुसिद्धंसौवर्णराजतेमृन्मयेपिवा॥ प्रक्षिप्यकालशोसम्य
क्सुनिगुप्तंनिधापयेत्॥७३॥ बलातैलमिदंनाम्नासर्ववातविकारनुत्॥ यथाबलंततोमात्रांसू
तिकायैप्रदापयेत्॥७४॥ याचगर्भार्थिनीनारीक्षीणशुक्रश्चयःपुमान्॥ वातक्षीणेमर्महतेमथितेभि
हतेतथा॥७५॥ भग्नेश्रमाभिपन्नेचसर्वथैवोपयुज्यते॥ एतदाक्षेपकादीन्वावातव्याधीन्व्यपोहति॥७६॥

॥७४॥ तासा

रु

॥७४॥

हिक्काश्वासमधीमंथंगुल्मंकासंसुदुस्तरं॥षण्मासानुप्रयोज्येततंदंत्रवरुद्धिमपोहति॥७७॥प्रसयग्र
ध्याकुपुरुषानवेद्ध्यस्थिरयोवनः॥रास्नामेतद्धिकूर्तध्यारास्नमान्याश्चयेनराः॥७८॥सुखिनःसुकु
मारश्च~~विद्धे~~धनिनश्चापियेनराः॥७९॥बालातैलं॥ ॥बिल्वाग्निमंथस्योनाकःपाटलापरिभद्रकः॥
प्रसारिण्यश्वगंधाचवृहतीकंटकारिका॥७०॥बलावात्तिबलाचैवश्वदंष्ट्रास्तपुनर्नवा॥एषांदश
पलान्भागानूचतुर्द्रोणेंभसःपचेत्॥८०॥पादशेषपरिश्राव्यतेनमात्रांप्रदापयेत्॥शतपुष्पादेवदारु
रुमांसशैलेयकंबला॥८१॥चंदनंतगरंकुष्टमेलापर्णीचतुष्टयं॥रास्नातुरगगंधाचसैधवंसपुनर्न
वा॥८२॥एषांद्विपलिकान्भागान्पेषयित्वाविनिक्षिपेत्॥शतावरीरसंचैवतैलतुल्यंप्रदापयेत्॥
॥८३॥अजंवायदिवागव्यंक्षीरंदद्याच्चतुर्गणं॥पानेबस्तोतथाभ्यंगेभोजनेत्रयप्रयोजयेत्॥८४॥अश्वो
वावातसंभग्नोगजोवायदिवानरः॥पंगुलःपीढसर्प्पीचतैलेनाननसिद्ध्यति॥८५॥अधोभागचयेवा
ताशिरोमध्येगताश्चये॥मन्यास्तंहनुस्तंभेभेदंतरोगेगलग्रहे॥८६॥यस्यशुष्यतिचैवांगंगतिर्यस्य
चविह्वला॥क्षीणेंद्रियानष्टशुक्राज्वरक्षीणाश्चयेनराः॥८७॥बधिरावद्दजिह्वाश्चमंधमेधसएवच॥

भै २

अल्पप्रजाचयानारीयाचगर्भंनविंदति॥८८॥वातार्त्तोवृषणोअंत्रवृद्धिश्चदारुणानिच॥एतत्तैलवरंतेषां
नाम्नानारायणंस्मृतं॥८९॥नारायणंतैलं॥ ॥शतावरीचांशुमतीपृष्टीपर्णिसटीबला॥एरंडस्यचमू
लानिवृहत्योपूतिकस्यच॥९०॥गवेधुकस्यमूलानितथासहचरस्यच॥एषांदशपलान्भागान्जल

बे४

द्रोणेविपाचयेत्॥९१॥पादावशेषेपूतेचगर्भेचैनंसमावपेत्॥पुनर्नवावचादारुशताव्हाचंदनागरू॥९२॥
शैलेयंतगरंकुष्ठमेलामांसीस्थिरावला॥अश्वगंधासैंधवंरास्नापलार्द्धानिचपेषयेत्॥९३॥गव्याजः
पयसःप्रस्थौद्वौद्वावत्रप्रदापयेत्॥शतावरीरसप्रस्थंतैलंप्रस्थंविपाचयेत्॥९४॥अस्यतैलस्यसिद्ध
स्यशृणुवीर्यमतःपरं॥आयुष्मांश्चनरःपीत्वानिश्चयेनदृढोभवेत्॥९५॥गर्भमश्वतरीविद्यात्किंपुन

॥८५॥

र्मानुषीतथा॥हृच्छूलंपार्श्वशूलंचतथैवार्द्धावभेदकं॥९६॥अपचीगंडमालांचवातरक्तंगलग्रहं॥नारा

॥८॥

यणमितिख्यातंशुभंवातविकारिणां॥९७॥महानारायणंतैलं॥ ॥कल्केमृणालशाल्मलूककविशालिकिंज
ल्कमालती॥पुष्पीव्हीवेरमधुकसारिवापद्मकेसरैः॥९८॥शतंपक्त्वाश्वगंधायाजलद्रोणेविपाचयेत्॥
विश्राव्याथविपचेत्तैलंदत्वाक्षीरंचतुर्गुणं॥९९॥मेदापुनर्नवाद्राक्षामंजिष्ठावृहतीद्वयेः॥एलैलवाल

१२

त्रिफलामुस्तचंदनपद्मकैः ॥ १७०० ॥ पक्वं रक्तामयं वातं रक्तपित्तं सगरं ॥ हन्यात्सुष्टिं बलं कुर्यात्सानाभ्यं
गानुवासनैः ॥ १ ॥ अश्वगंधाद्यं तैलं ॥ ॥ माषात्तसीयवकुरंटककंटकारीगोक्षुरविंदुकजटाकपिक्क
घृताये ॥ स्वयंगुप्तास्थिसर्पबीजकुलत्थकोलाक्वाथेनबस्तपिसितस्य रसेन वापि ॥ २ ॥ शुद्ध्यासमा
गंधिकयासितपुष्पपाचसैरंडमूलसपुनर्नवयासरण्या ॥ रास्नाबलामृतलतात्रिकटुर्विपक्वं माषाख्य
मेतदवबाहुहरंचतैलं ॥ ३ ॥ अर्द्धांगशोषमपतानकमाद्यवातमाक्षेपकंपनुजकंपशिरःप्रकंपं ॥ नस्येन
बस्तिविधिनापरिषेचनेनहन्यात्कटीजघनजानुभुजंसमीरं ॥ ४ ॥ माषतैलं ॥ ॥ माषक्वाथबलाक्वाथे
रास्नायादशमूलजे ॥ यवकोलकुलत्थानांछागमांसंरसेस्थके ॥ ५ ॥ प्रस्थंतैलस्यचैकंक्षीरंदद्याच
तुर्गुणं ॥ रास्नात्मगुप्तासिंधूत्थशताह्वैरंडमुस्तकैः ॥ ६ ॥ जीवनीयबलाव्योषैः पचेदक्षसमैर्भिषक् ॥ हस्त
कंपेशिरःकंपेबाहुशोषेवबाहुके ॥ ७ ॥ बाधिर्येकर्णशूलेचकर्णनादेचदारुणे ॥ विश्वाच्यामर्दितेकुब्जेग
ध्रस्यामपतानके ॥ ८ ॥ बस्त्यभ्यंजनपानेषुपाचनेषुप्रयोजयेत् ॥ माषतैलमिदंश्रेष्ठंउर्द्धजंतुगदापहं ॥
॥ ९ ॥ वृहन्माषतैलं ॥ ॥ द्विपंचमूलीनिक्वाथ्यतैलंतोयेकुडवेनिर्गुणेः ॥ माषाढकंसाधयित्वातन्निर्यू

153

हं च चतुर्गुणं ॥१०॥ ग्राहयित्वा च विपचेत्तैलप्रस्थं पृथक् समं ॥ कल्कार्थं च समावाप्य भिषक् द्रव्याणि बुद्धि
मान् ॥११॥ अश्वगंधां सठीं दारु बलां रास्नां प्रसारणी ॥ कुष्टं परुषकं भार्गी द्विविदार्यौ पुनर्नवा ॥१२॥ मातुलुं
ग फलाजाज्यौ रामठं शतपुष्पिका ॥ शतावरीं गोक्षुरकं पिप्पलीमूलचित्रकं ॥१३॥ जीवनीयगणं सर्वं
संहृत्यैवं समं धचं ॥ तत्साधु सिद्धं विज्ञाय माषतैलमिदं हरेत् ॥१४॥ बस्त्यभ्यंजनपानेषु नावने च प्रयो
जयेत् ॥ पक्षाघाते हनुस्तंभे चार्दिते सापतंत्रके ॥१५॥ अवबाहुके विश्वाच्यां खंजपंगुलयोरपि ॥
हस्तकंपे शिरःकंपे कुब्जे मानयोरपि ॥१६॥ हनुमन्याग्रहे चैव अधिमंथे च वातिके ॥ शुक्रक्षये कर्णना
दे कर्णशूले च पूरणे ॥१७॥ कुलायखंजं रामने भैषज्यमिदमादिशेत् ॥१८॥ महामाषतैलं ॥ ॥ कृतद्वि
मूलबलातिबलानां यद्बहुलेन रसेन विपक्वं ॥ तैलमनल्पतुषोदकसिद्धं मारुतमस्थिगतं प्रहित
॥१९॥ कृतव्याद्यं तैलं ॥ ॥ रसोनकल्कस्वरसैर्विपक्वं तैलं पिबेद्यस्त्वनिलामयार्त्तः ॥ तस्याशु नश्यं
ति हि वातरोगा ग्रंथ्या विशाला इव दुर्गहीनाः ॥२०॥ रसोनतैलं ॥ ॥ प्रसारण्यास्तुलामश्वगंधायाश्च द
शमूलतः ॥ तुल्यं तुल्यं पचेद्वारिद्रोणपक्वांशशोषिते ॥२१॥ तैलाढकं च चतुःक्षीरं दधितुल्यं द्विकांजि

॥७८॥ पा६ ॥७८॥ न६४ ॥ र

154

कं॥ द्विपलैर्ग्रंथिकसारप्रसारिण्यक्षसैंधवैः॥२२॥ समंजिष्टाग्नियष्ट्याह्वैः पलिकैर्जीवनीयकैः॥ सु
ध्यां पंचपकं दत्वा त्रिंशद्भल्लातकानि च॥२३॥ पचेद्दास्तदिना वातं हंति संधिशिरोगतं॥ पुंस्त्वाहापस्मृ
तिप्रज्ञा बलवर्णाग्निवर्द्धये॥२४॥ अक्षं सौवर्चलं तैलं यमेध्यं वातहृत्शुभं॥ ॥प्रसारणितैलं॥ ॥प्रसा
रण्यतैलं॥ ॥प्रसारणीशतं क्षुण्णं पचेत्तोयार्मणे शुभे॥२५॥ तेन पादावशेषेण तैलं दद्यात्सखं जिकं॥
द्विगुणं च पयो दद्यात्कल्कान्द्विपलिकांस्तथा॥२६॥ चित्रकं पिप्पलीमूलं मधुकं सैंधवं वचा॥ शतपुष्पां
देवदारु रास्नावारुणपिप्पली॥२७॥ प्रसारिण्याश्च मूलानि मांसी भल्लातकानि च॥ पचेन्मृद्वग्निना
तैलं वातश्लेष्मानिलान्जयेत्॥२८॥ अशीतिर्नरनारीस्थान्वातरोगान्व्यपोहति॥ कुब्जान्नूतिमिपरपं
गुत्वंगृध्रस्यामर्द्दितं तथा॥२९॥ हनुपृष्टं शिरोग्रीवास्तंभं चाशु नियच्छति॥ ॥कुब्जप्रसारणीतैलं॥ ॥
समूलपत्रां मुसाध्य शरत्कुलेप्रसारणीं॥३०॥ शतं याह्यं सहचरात्सतावर्याः शतं तथा॥ बलाश्वगंधा
त्मगुप्ताकेतकीनां शतं शतं॥३१॥ पचेच्चतुर्गुणे तोये द्रव्ये द्रोलाढकं भिषक्॥ मस्तुमांसरसं चुक्रं प
यसश्चाढका ढकं॥३२॥ दध्याढकसमायुक्तं॥ पाचयेन्मृदुनाग्निना॥ द्रव्याणां तु प्रदातव्या मात्राता

द्विपलानि च ॥ ६२ ॥ नागरं चंदनं कुष्ठं केशरं मुस्तकं त्वचं ॥ रास्नां सैंधवपिप्पल्यो मांसी मंजिष्ठ यष्टिका
॥ ६३ ॥ तथा मेदा महामेदा जीवकर्षभकौ पुनः ॥ शतपुष्पा व्याघ्रनखं शुंठी देवाह्वमेव च ॥ ६४ ॥ काको-
ली क्षीरकाकोली वचा भल्लातकं तथा ॥ पीषयित्वा समानेतानु साधनीयाः प्रसारणी ॥ ६५ ॥ नातिप-
क्वं न हीनं च सिद्धं पूतं निधापयेत् ॥ यत्र यत्र प्रदातव्या तन्मे निगदितः शृणु ॥ ६६ ॥ कुब्जानामथ पंगूनां
वामनानां तथैव च ॥ यशस्तु ष्पतिश्चैकांगं ये च नाग्न्यास्थिसंधयः ॥ ६७ ॥ वातशोणितदुष्टानां वालोपह-
तचेतसां ॥ स्त्रीमदक्षीणशुक्राणां वाजीकरणमुत्तमं ॥ ६८ ॥ वस्तौ पाने तथाभ्यंगे भोज्ये चैव प्रदापयेत् ॥
प्रयुक्तं नाशयत्याशु वातजान्विधान्गदान् ॥ ७० ॥ सप्तशतिकाप्रसारणी तैलं ॥ ॥ शाखामूलदलैः प्र-

॥७७

सारणि तुला स्तिस्रः कुरंटतुले छिन्नायाश्चतुरस्तुले त्वरबुतोरास्नाशारीषातुलां ॥ वेदा हान्तु स दे-

॥७८

के तत्काथ घ तं शानैः निःकाथ्य कुंभांशक्तोयं तैलघटं तुषांबुकलशो दत्त्वाढकं मस्तुनः ॥ ७१ ॥ शुक्तात्
खागरसा दध्येक्षुरसतः क्षीराच्च दत्त्वाढकं स्पृक्का कर्कटजीवकर्द्धिविक्रुसाकाकोल्वाक्षघुरा ॥ सूक्ष्मैला
घनसारकुंदसरलाशाब्मीरमांसीनखैः कल्कियोत्सलपद्मकाह्वयनिशाकाकोलिकग्रंथिकैः ॥ ७२ ॥

चांगेर्यानयचोवपूगकुटुन्नाराजीपुन्नाभीरूभिश्रीवासामरदारुचंदनवचाशैलेयसिंधुद्भवैः॥
शैलांभोदकटंनरागिनलिकावस्त्रीकसन्चोरकैः कस्तूरीदशमूलश्वेतनतंशामांश्वगंधांबुभिः॥
॥४३॥ क्रौंतीताक्ष्यतन्त्राह्लकीफललघुश्यामाशताव्हामयैः नल्लातत्रिफलांबुवेसरमहाश्यामालवं
गान्वितैः॥ सव्योषैस्त्रिफलैर्महीयसीपचेन्मंदेनपात्रेग्निनापानाभ्यंजनवस्तिनस्यविधिनात
न्मारुतंनाशयेत्॥४४॥ सर्वांगैकांगगतंतथावयवगंसंध्यस्थिमज्जाश्रीतंश्लेष्मस्थानपिपेतिक
श्वशमयेन्नानाविधानामयान्॥ धातून्वंहयतिस्थिरंचकुरुतेपुंसांनवंयौवनंवृद्धस्यापिबलंक
रोतिसमुहद्वंध्यासुगर्भप्रदं॥४५॥ पीत्वातैलमिदंसंक्षितुं सुतंसत्वेमुनाभ्रूरुहाःसिक्ताःशोषमुपा
गताश्चपुलिनःस्निग्धाभवंतिस्थिरा॥ नाग्नांगाःसुदृढाभवंतिमनुजागावोहयाःकुंजराः
॥४६॥ एकादशांतिकं महाप्रसारणीतैलं॥ ॥यागंधंकेत
केनांवहतिपरिमलंवर्णनःपिंजरामास्वादेतिक्ताकटुर्वापरिलघुतुलितामर्द्दिनाचिक्कणाचाद्ग्धा
नोयातिभस्मंचिमन्चिमतिकरीमर्चमर्गंधाहुतात्रो॥ सान्तुद्धात्रो॥ ननीयावरम्यगनलजाराजयोग्याप्र

सु ५

दिष्टा ॥ ४७ ॥ कुरतकजलमध्ये स्थापयित्वा महद्भिः पुनरपि तद्दग्धं चिंतनीयं मुहूर्त्तं ॥ न यति यदि
सरक्तं तज्जलं पीतवर्णं न नयति मृगनाभिः कृत्रिमो न्यो विकारः ॥ ४८ ॥ द्वे पले सैंधवास्यं च सुंठ्याश्च
विडं चित्रकात् ॥ द्वे द्वे भल्लातकास्थीनि विंशति द्वे न याढके ॥ ४९ ॥ आरनालस्य चेत्प्रस्थं तैलं सैतेर
पत्तसदं ॥ गृध्रस्यं रूयहाश्रोन्ति सर्ववातविकारनुत् ॥ ५० ॥ सैंधवाद्यं तैलं ॥ ॥ वल्कलायाः सुराया
सुसुपक्वायाः शतं घटे ॥ ततोर्द्धेन रसोनं तु तुसश्शुद्धं कुदितं क्षिपेत् ॥ ५१ ॥ पिप्पलीमूलमजाजीं चव्य मरिचं
चित्रकात् ॥ नागरं मरिचं कुष्टं चूर्णितान्वाक्षसंमितं ॥ ५२ ॥ ससाहात्परतः पेया वातरोगविनाशनी ॥
कृमिकुष्टक्षयानाहगुल्मार्शः प्लीह एव तत् ॥ ५३ ॥ अग्निसंदीपनो चैव पांडुरोगविनाशनो ॥ सर्पि
॥७८॥ तैलवसामज्जापानाभ्यंजनबस्तयः ॥ ५४ ॥ स्वेदाः स्निग्धा निवातं च स्थानं प्रावरणानि च ॥ बृंहणं ॥७८॥
पस्त्र्यराः सर्वं प्रशस्तं वातरोगिणां ॥ ५५ ॥ रसाः पयांसि भोज्यानि स्वाद्वम्ललवणानि च ॥ ॥ इति वं
दे वातव्याध्यधिकारो नाम द्वाविंशतिमः ॥ ॥ अथ वातरक्तचिकित्सितं व्याख्यास्यामः ॥ ॥ उत्ता
नमवगाढं च द्विविधं वातशोणितं ॥ त्वग्मांसाश्रयमुत्तानमवगाढं तराश्रयं ॥ ५७ ॥ पिंडतैलादिनाभ्यंगः

पानंतिक्तादिसर्प्पिषः॥सेकालेपाह्यसृग्युक्तिः शोधनंचोभयोर्हितं॥५८॥गाढविशोषतः सर्प्पिः
पानसुद्धिः सिराव्यधाः॥गोधूमचूर्णछगलीपयश्चसच्छागदुग्धोरुबुबीजकल्कः॥५९॥लेपोविधे
यंत्रातधौतसर्प्पिः सेकेपयश्चाधिक्रमेवशस्तं॥अम्भोजानागराधान्यात्कर्षत्रितयेनपाचनंसिद्धं॥६०॥
जयंतिसरक्तवातमांसकुष्टान्यशेषेण॥वत्सादन्युद्भवः क्वाथः पीतोगुग्गुलुमिश्रितः॥६१॥समी
रणासमायुक्तंशोणितंसंप्रसाधयेत्॥६२॥वासागुडूचीचतुरंगुलानामेरंडतैलेनपिबेत्कषायं॥
क्रमेणसर्वांगजमप्यशेषंजयेदसृग्वातभवंविकारं॥६३॥तिस्रोथवापंचगुडेनपथ्याजग्ध्वापि
बेच्छिन्नरुहाकषायं॥तद्वातरक्तंशमयत्युदीर्णमाजानुसंभिन्नमपिह्यवश्यं॥६४॥घृतेनवातं
सगुडाविबंधंपित्तंसिताढ्यामधुनाकफंच॥वातास्रगेरुबुतैलमिश्रंसुध्यामवातंशमयेद्गुडूची
॥६५॥अमृताकफवातघ्नीकफमेदोविशोषणी॥वातरक्तप्रसमनीचूर्णवीसर्प्पनाशनी॥६६॥गुडूच्याः
स्वरसंकल्कंचूर्णंवाक्वाथमेवच॥प्रभूतकालमासेव्यंमुच्यतेवातशोणितात्॥६७॥तच्छिद्दारी
क्षुरकः क्वाथोवातास्रनाशनः॥पटोलत्रिफलाभीरुवृद्धकामृतंघृतं॥६८॥क्वाथंपीत्वाजयत्यास्तु

सा.१

सदाहं वातशोणितं॥ दन्नाम्रलीस्तं क्षीरंसघ शूलनिवारणं॥६९॥ परिषेको निलप्रायेतक्कोष्णेन सस
र्प्पिषा॥७०॥ धात्रीमुस्ताहरिद्राणां कषायं वा कफाधिके॥ कोकिलाख्यामृता क्वाथे पिबेत्तच्छायं यथाबलं
॥७१॥ पथ्या नोजित्रससाहान्मुच्यते वातशोणितात्॥ कफरक्तप्रशमनं कंडूत्वामसर्प्पनाशनं॥७२॥ विं
सैंहास्य पंचमूलम्मूलीछिन्नरुहेरंड गोक्षुरक्वाथः॥ एरंडतैलमथ ठसें धवचूर्णान्वितः पीतः॥७३॥
प्रशायति वातरक्तं तथामवाताङ्कचंक्रटीशूलं॥ मूत्रपुरीषविबंधं चर्मविकारस्य दुर्वारं॥७४॥ अमृ
ताकटुकायष्टीसुंठीकल्कं समाक्षिकं॥ गोमूत्रपीतं जयति सकफं वातशोणितं॥७५॥ पिप्पलीवर्द्ध
मानं वासेव्य पथ्यागुडेन वा॥ त्रिफलायाः कषायं वा कफाधिके प्रयोजये॥७६॥ सर्प्पिस्तैलवसाम
ज्जापानाभ्यंजनबस्तिभिः॥ सुखोष्णैरुपनाहैश्च वातोत्तरमुपाचरेत्॥७७॥ मधुकाद्द्विगुणं तैलं
तैलाद्द्विजं पयो भवेत्॥ एतद्यथाबलं पेयं वातरक्तविनाशनं॥७८॥ लेपः पिष्टास्तिलाः सम्यक्भृ
ष्टाः सिनिर्वृताः॥ क्षीरपिष्टास्तसीलेपो वर्द्धमानफलेन वा॥७९॥ रास्नागुडूचीमधुकं बलेद्वे सजीव
वकर्षभकं पयश्च॥ घृतं च सिद्धं मधुशेषयुक्तानिलार्त्तिप्रणुदे स्वदेहः॥८०॥ सहस्रशतधौतेन

घृतेन रुधिरोत्तरे ॥ लेपनं उष्णंउष्णशीतेन घृत सर्जरसेन वा ॥ ८१ ॥ क्रोष्टाद्यावातोत्तरे सेकाः मज्जतैल
वसाघृतैः ॥ रक्तोत्तरे क्षीरघृतं मधुक्षौद्रशीत वारिभिः ॥ ८२ ॥ लेपनं शाल्मलीकल्कं मविक्षीरेण संयु
तं ॥ सेचनं वाव कर्त्तव्यमविक्षीरैः क्षणं क्षणं ॥ ८३ ॥ शौवातरक्त प्रशमनं शीलयेत्तममादृतः ॥ लां
गल्यास्तु मज्जा सांगं चूर्णं दग्धु ध्व्ययत्नतः ॥ ८४ ॥ योजयेत्त्रिफलालोह रजांसि कटुकैः सह ॥ गुग्गुलं स्य
मृतवल्लिनिर्मातुलुंगरसेन वा ॥ ८५ ॥ त्रिफलाक्वाथयारसे युक्ता गुटिका कोलसंमिता ॥ नक्षयेन्मधुना
लोड्यम्रणुत्र्वति यस्रक्तं ॥ ८६ ॥ पादस्फोटं महाघोरं स्फोटं सर्वांगजं च यत् ॥ तत्सर्वं नाशयत्या
शु प्राशसाध्यं चैव शोणितं ॥ ८७ ॥ त्रिफलानिंबमंजिष्ठा वचा कटुकरोहिणी ॥ वत्सादनी दारुनि
शाकषाय्यं नवकार्षिकं ॥ ८८ ॥ वातरक्तं तथा कुष्टं पामां विरक्त मंडलं ॥ कुष्टं कपालिकं कुष्टं पाना
देवापकर्षति ॥ ८९ ॥ नवकार्षिकं ॥ ॥ कर्षादौतु पलं यावद्द्व्याखोर्यं शिक्कजलं ॥ ततस्तु कुडवं यावत्तो
यमष्टगुणं नचेत् ॥ ९० ॥ गुडूचीक्वाथकल्काभ्यां सपयस्कं घृतं सृतं ॥ हंति वातं तथा रक्तं कुष्टं जयात्य
दुस्तरं ॥ ९१ ॥ गुडूचीघृतं ॥ ॥ अमृतायाः पंचशतं जलद्रोणे विपाचयेत् ॥ तेन पादावशेषेण

161

॥१८०॥

घृतप्रस्थं विपाचयेत्॥९२॥ अमृतायाः फलान्यष्टौ कल्कयेष्यानि कारयेत्॥ चतुर्गुणेन पयसा तैलं
क्षीरं च तुर्गुणं॥९३॥ दशपाकं भवेदेतद्धातासृक्कुष्ठनाशनं॥ कामलापांडुरोगघ्नं प्लीहकासज्वराप
हं॥९४॥ शतावरीकल्कगर्भे रसे तस्याश्चतुर्गुणे॥ क्षीरतुल्यं घृतं सिद्धं वातशोणितनाशनं॥९५॥ ब
लाकषायकल्काभ्यां तैलं क्षीरसमं पचेत्॥ सहस्रशतपाकं वातमस्तकवातपित्तनुत्॥९६॥ रसाय
नमिदं श्रेष्ठमिंद्रियाणां प्रबोधनं जीवनं बृंहणं स्वर्यं वातासृग्दाहनाशनं॥९७॥ धन्यं पुंसवनं चै
व नारीणां शुक्रवर्द्धनं॥ रेतोयोनिविकारघ्नमेतद्धातविकारनुत्॥९८॥ शताह्वयाच कुष्ठेन मधूके
नन तेन च॥ एकैकं साधितं तैलं वातरक्तरुजापहं॥९९॥ सारिवासर्जमंजिष्ठा यष्टीकल्कपयोन्वि
तं॥ तैलं पक्वं प्रयोक्तव्यं पिंडारव्य(?) वातशोणितं॥१००॥ समधूच्छिष्टमंजिष्ठं ससर्ज्जरससाधितं॥ पिं
डतैलं तदभ्यंगाद्वातरक्तरुजापहं॥१॥ सारिबासर्जयष्ट्याह्वम धूच्छिष्टैः पयोन्वितं॥ सिद्धं सरंज
जे तैलं अभ्यंगाद्वातरक्तनुत्॥ पद्मकोशीरयष्ट्याह्वरजनीक्वाथसाधितं॥ स्यात् सिद्धैः सर्जमंजि
ष्ठान्वीराकौलि(?)ब्रंदनैः॥२॥ खुड्डाख्यपद्मकमिदं तैलं रुग्दाहनाशनं॥ बलाचातिबलामेदामास
को

॥१८

गुसांत्रानावरी॥ ४॥ काकोलीं क्षीरकाकोलीरास्नामद्वीचपाचयेत्॥ घृतंचतुर्गुणं क्षीरंतैलवावात
रक्तनुत्॥ ५॥ हृत्पांडुरोगविसर्प्पकामलादाहनाशनं॥ श्रावणीक्षीरकाकोली क्षीरिकाजीवकै समैः
॥ ६॥ सिद्धंसर्षनकैसर्प्पिःसक्षीरं वातरक्तनुत्॥ वमने हिपलोचनोदरसन्निन्नवमीर्णपस्यगुग्गुलोः
पस्ततं॥ ७॥ प्रक्षिप्यतोयरौरात्रौत्रिफलाममतायथोक्तपरिमाणां॥ संसाधयेत्सयुक्त्यदर्व्यासंघद
येच्चतावात्॥ ८॥ अर्द्धक्षयितंजातंतोयंज्वलनस्यसंपक्कात्॥ अवतार्यवस्त्रपूतंपुनरपिसंसाध
येदयःपात्रे॥ ९॥ सांद्रीभूतेतस्मिन्अवतार्यहिमोपलस्पर्शे॥ पथ्याचूर्णद्विपलत्रीकटुकचूर्णं
तदक्षपरिमाणं॥ १०॥ कृमिरिपुचूर्णंद्विपलंकर्षत्रिवदंसो॥ पलमेकंछिन्नरुहंदहत्वासमद्ध्ये
तत्प्रयत्नेन॥ ११॥ संस्थापयेच्चगुसंस्निग्धभांडेघृतेनसुरभिणां॥ आदायतस्यमात्रांविदितानि
थिर्देवताप्रणम्येति॥ १२॥ खादेद्यथाग्निमनुनोव्याधिबलापेक्षयासम्यक्॥ उपयुज्यचानुपाने
यूषंमंडंसुगंधीसलिलंच॥ १३॥ इष्टाहारविहारोभेषजकालाश्चसर्वस्युः॥ तनुर्गरोधिवातशो
णितमेकहिनुल्बणं चिरोत्थमपि॥ १४॥ भग्नच्युतपरिस्थितंस्फुटितमपिनिहंतियत्नेन॥ व्रणका

६९

163

सगुल्मंकुष्टंश्वयथूदरपांडुरोगामेहांसि ॥१५॥ मंदाग्नित्वविबंधेप्रमेहदोषांश्चनाशयति ॥ भ्य
सततंनिषेव्यमाणः कालेननिर्हंति रोगगणं ॥१६॥ अभिनूयजरादोषंकरोतिकैशोरकंरूपं ॥ ॥
कैशोरकोगुग्गुलः ॥ ॥प्रस्थमेकंगुडूच्याश्च अर्द्धप्रस्थंतुगुग्गुलुः ॥१७॥ प्रत्येकंत्रिफलायाश्च
तत्समाणंविनिर्द्दिशेत् ॥ सर्वमेकत्रसंक्षिप्यक्वाथयेत्तुल्वणेनसि ॥१८॥ पादशेषंपरिस्राव्यंकषा
यंग्रहयेद्भिषक् ॥ पुनःपचेत्कषायंतुयावत्सांद्रत्वमागतं ॥१९॥ दंतीव्योषविडंगानिगुडूचीत्रिफला
वचः ॥ ततश्चार्द्धपलंपूतंगृहीयाद्भागप्रतिप्रति ॥२०॥ कर्षंतुत्रितायाश्चसर्वमेकत्रचूर्णयेत् ॥ वातरक्तं
तथाकुष्टंगुदजान्यग्निसाधनं ॥२१॥ दुष्टव्रणंप्रदेहांश्चआमवातंनगंदरान् ॥ नाड्याधानश्चव
पथूंस्तर्चनेतान्व्यपोहति ॥२२॥ अश्विभ्यांनिर्मितःपूर्वंमहिषाख्यश्चगुग्गुलुः ॥२३॥ महिषगुग्गु
लुः ॥ ॥अमृतायाद्विप्रस्थंप्रस्थमेकंतुगुग्गुलोः ॥ प्रत्येकंत्रिफलाप्रस्थंवर्षाभूप्रस्थमेववा ॥२३॥
सर्वमेकत्रसंक्षुद्यक्वाथयेन्नल्वणेनासि ॥ पुनःपचेत्सांद्रशेषंयावत्सांद्रत्वमागतं ॥२४॥ दंतिचि
त्रकमूलानांकणाविश्वाफलत्रिकं ॥ गुडूचीत्वक्विडंगानांप्रत्येकार्द्धपलंमतं ॥२५॥ त्वक्त्रिवृत्कर्षं

॥८१॥

मेकंतुसर्वमेकत्र चूर्णयेत्॥ सिद्धमुष्ठेन्यसेत्तत्र अमृतागुग्गुलोपलं॥२६॥ तद्यथाग्निबलंखादेद
स्मापित्ते विशोषणः॥ वातरक्तंतथाकुष्टंगुदजान्यग्निसादनं॥२७॥ दुष्टव्रणप्रदेहाश्च आमवातंभगं
दरं॥ नाड्योढवातश्वयथून्सर्वानितान्व्यपोहति॥२८॥ अश्विभ्यांनिर्मितेह्येष आमृताख्यस्यगुग्गुलुः
॥ ॥इतिआमृताद्योगुग्गुलः॥ ॥शतावरीनागबलादेवदारुंतमुस्तकाः॥२९॥ पुनर्नवामृताकृष्णा
वाजिगंधात्रिकंटकाः॥ पथक्दशपलानेतान्सूक्ष्मचूर्णानिकारयेत्॥ तदर्द्धशर्करायुक्तान्चूर्णा
न्संमर्द्दयेद्बुधः॥३०॥ स्थापयेत्स्नीग्धभांडेतु मध्वर्द्धाटिकसंयुतं॥ एकत्रसर्वमालोड्यत्रिसुगंधि
पलेनच॥३१॥ तद्यथाग्निबलंहातातस्यमात्रांप्रयोजयेत्॥ वातरक्तंक्षयंकुष्टंकासंश्वासंमरोच
कं॥३२॥ वातपित्तकफप्रायान्द्वंद्वजान्संनिपातकान्॥ हत्वांकरोतिपुरुषंवलीपलितवर्जितं॥३३॥
योगसारामृतोनाम प्रज्ञाकांतिविवर्द्धनः॥ दिवास्वप्नंवन्हितापंव्यायामंमैथुनंतथा॥ कटूष्णंगुर्व
भिस्यदिलवणाम्लानिवर्जयेत्॥३४॥ ॥इतिचंद्रेवातरक्तचिकित्सितेत्रयोविंशतिमोध्यायः॥
अथारुस्तंभचिकित्सितंव्याख्यास्यामः॥ ॥भल्लातकामृतासुंठीदारूपथ्यापुनर्नवाः॥ पंच

मूलीद्वयोर्मिश्रमुरुस्तंभनिबर्हणं ॥ ७७ ॥ पिप्पलीपिप्पलीमूलं भल्लातकफलानि च ॥ कल्कं मधुयुतं पी
त्वा ऊरुस्तंभाद्विमुच्यते ॥ ७८ ॥ ग्रंथिकारुकरञ्जानां क्वाथं क्षौद्रान्वितं पिबेत् ॥ चव्यानयाग्निदारूणां कल्कं
वा मधुसंयुतं ॥ ७९ ॥ त्रिफलाचव्यकटुकं ग्रंथिकं मधुना लिहेत् ॥ ऊरुस्तंभविनाशाय पुरं मूत्रेण वा पिबेत्
॥ ८० ॥ लिह्याच्च त्रिफलाचूर्णं क्षौद्रेण कटुकान्वितं ॥ सुखांबुना पिबेद्वापि चूर्णं षट्धरणं नरः ॥ ८१ ॥ च
पिप्पलीवर्द्धमानं वा माक्षिकेण गुडेन वा ॥ ऊरुस्तंभे प्रशंसंति गंडीरं ष्टकमेव च ॥ ८२ ॥ सक्षारमूत्रैः श्वे
तांश्च करंजफलसर्षपैः ॥ मूलैर्वाप्यश्वगंधाया मूलैरर्कस्य वा भिषक् ॥ ८३ ॥ पिचुमंदस्य वा मूलैर
॥८२॥ थवा देवदारुणः ॥ क्षौद्रसर्षपवल्मीकमृत्तिकासंयुतैर्भिषक् ॥ ८४ ॥ गाढमुत्सादनं कुर्यात् ऊरुस्तंभे प्र
लेपनं ॥ दंतिद्रवंतिसुरसासर्षपैश्चापि बुद्धिमान् ॥ ८५ ॥ तर्कारीविश्वसुरसं शिग्रुवत्सकनिंबजैः ॥ प ॥८२
त्रमूलफलैस्तोयं स्नानमुष्णं च सेवनं ॥ ८६ ॥ कुष्ठं श्रीवेष्टकोदीच्यसरलं दारुकेसरं ॥ अजगंधाश्वगंधा
चतिलं तैलं च सार्षपं ॥ ८७ ॥ साक्षौद्रं मात्रया तस्मादूरुस्तंभार्द्दितः पिबेत् ॥ बल्लास्यां पिप्पलीमूलं ना
गरादष्टकं तक्रहृद्यरः ॥ ८८ ॥ तैलप्रस्थं समोदध्नात् प्रस्यूरुग्रहापहं ॥ यस्याः कफप्रशमनं न च मारुत

कोपनं॥ तस्मात्सर्वं सर्वदा कार्यमुरुस्तंभस्य भेषजं॥ ४८॥ ॥ इति वृंदे ऊरुस्तंभचिकित्सितं चतुर्विंशतिमोध्यायः॥ ॥ अथामवातचिकित्सितं व्याख्यास्यामः॥ ॥ शुंठीगोक्षुरकक्वाथः प्रातः प्रातर्निषेवितः॥ सामवातकटीशूलपाचनं रुक्प्रणाशनं॥ ५०॥ रास्नागुडूचीचैरंडदेवदारुमहौषधं॥ पिबेत्सर्वांगजे वाते सामे संध्यस्थिमज्जगे॥ ५१॥ रास्नामृतारग्वधदेवदारुत्रिकंटकैरंडपुनर्नवानां॥ क्वाथं पिबेन्नागरचूर्णमिश्रं जंघोरुपार्श्वत्रिकपृष्ठशूली॥ ५२॥ दन्त्याम्लीकषायेण पिबेद्वा नागरांभसा॥ कटिशूले शुष्कसर्वेषु तैलमेरंडसंभवं॥ ५३॥ शठीशुंठ्यभयाचोग्रादेवाह्वातिविषामृता॥ कषायमामवातस्य पाचनं रूक्षभोजनं॥ ५४॥ पिप्पली पिप्पलीमूलं चव्यचित्रकनागरं॥ क्वथितं वा क्षरेदेतदामवातं सुदारुणं॥ ५५॥ चित्रकः कटुकापाठा कलिंगातिविषामृता॥ देवदारुवचामुस्तानागरातिविषारुणाः॥ ५६॥ पिबेदुष्णांबुना निःसामामवातस्य भेषजं॥ चित्रकेंद्रजवाः पाठा कटुकातिविषाभया॥ ५७॥ आमवातहरं चैव चूर्णं पेयं सुखांबुना॥ अलंबुषा गोक्षुरकत्रिफलानागरामृताः॥ ५८॥ अथोत्तरं भागवृद्ध्या श्यामाचूर्णं च तत्समं॥ पिबेन्मस्तुसुरातक्रकांजिकोष्णोदकेन वा॥ ५९॥ आमवातं जयत्याशु सशोथं वातशोणितं॥ अलंबुषा गोक्षुरम्

लंवाचरूणस्यच॥६०॥गुडूचीनागरंचेतिसमभागानिचूर्णयेत्॥क्षौद्रेणतुतस्येयंबिडालपदसंमि
तं॥६१॥आमवातेप्रवृद्धेपियोगोयमम्नोपमः॥मणिमंथस्यभागौद्वौयवक्षारस्यतत्समं॥६२॥त्रयोज
२१३ मोदभागाश्वनागरङ्गागपंचकं॥दन्त्याश्चैवहरीतक्याःसूक्ष्मचूर्णकृतंशुभं॥६३॥मस्तारनालमूत्रेश्वसु
रयाप्युष्णोदकेनवा॥पीतंजयेदामवातगुल्महृद्वस्तिजान्गदान्॥६४॥प्लीहानमथशूलआदीनानाहस्या
र्शसांहितं॥वातानुलोमनमिदंचूर्णवैश्वानरंस्मृतं॥६५॥हिंगुचव्यबिडंसुंठीकृष्णाजाजीसपुष्करं॥भा
गोत्तरमिदंचूर्णपित्तवातामजिद्भवेत्॥६६॥तैलमेरंडतैलंवागदसर्पिःसरामठं॥पीत्वामस्तारनाले ॥८॥
॥८६॥ नमिश्रीतंसामवातजित्॥६७॥पुनर्नवासदेवाह्वासठीसुंठीतिक्तांतिमः॥प्रसारणीचतर्कारीफलंवाम
दनस्यच॥६८॥चुकुक्रांजिकापिष्टाश्चसुश्लक्ष्णालेपनेहिताः॥पुनर्नवार्कबृहतीवर्द्धमानफणिज्जकैः
॥६९॥कल्पयेत्क्वाथमेतैस्तुदूर्वाशिग्रुसनैर्भिषक्॥स्वेचनंसामवातस्योरूबूकपयसापिवा॥७०॥
इतिवृंदआमवातचिकित्सितेपंचविंशतिमोध्यायः॥ ॥अथशूलचिकित्सितंव्याख्यास्यामः॥ ॥
चूर्णतदेतदितितुंबरपुष्कराह्वःपथ्यांम्लवेनसबिडंरूचकंचहिंगु॥सिंधुद्भवेनसहितंयववारिपीतं

शूलापतंत्रकविकारहरं प्रदिष्टं ॥ तुंबरूण्यभयाहिंगुपुष्करं लवणत्रयं ॥ पिबेद्यवांबुना प्रातः शूलगुल्मा
पतंत्रकी ॥ ७३ ॥ हिंगुसौवर्चलं पथ्या बिडसैंधवतुंबरु ॥ पौष्करं च पिबेच्चूर्णं दशमूलजवांभसा ॥ ७४ ॥
पार्श्वहृत्कुक्षिपृष्ठानां शूलतंत्रापतानके ॥ श्लेष्मणा वेप्रसेके च गलरोगे च शस्यते ॥ ७५ ॥ विश्वोरुबू
कदशमूलयवांभसेन तु ॥ द्विक्षारहिंगुलवणत्रयपुष्कराणां ॥ चूर्णं पिबेद्धृदयपृष्ठकटिग्रहार्मे
पक्वाशयांशत्रिशिरज्वरपार्श्वशूली ॥ ७६ ॥ एरंडबिल्वबृहतिद्वयमातुलुंगपाषाणभित्त्रिकटमूल
कृतः कषायः ॥ सक्षारहिंगुलवणोरुबुतैलमिश्रः श्रोण्यूरमेढ्रहृदयस्तनरुक्षु पेयाः ॥ बलापुनर्नवै
रंडबृहतिद्वयगोक्षुरैः ॥ सहिंगुलवणैः पितं सद्यो वातरुजापहं ॥ ७८ ॥ चूर्णं समरुचकहिंगुमहौष
धीनामुष्णांबुना कफसमीरणसंभवासु ॥ ७९ ॥ हृत्पार्श्वपृष्ठजठरार्तिविशूचिकासु पर्यंतथा यवरसेन
नविद्धि बंधोः ॥ ८० ॥ हिंग्वम्लवेतसामलकं यवास्ति द्राक्षाभयासैंधवतुल्यभागं ॥ चूर्णं पिबेद्दारुणिमं
उमिश्रं शूले प्रवृद्धेनिलजे शिवाय ॥ ८१ ॥ यवानिहिंगुसिंधूत्थक्षारसौवर्चलाभयाः ॥ सुरामंडेन पा
तव्या वातशूलनिषूदना ॥ ८२ ॥ सौवर्चलाग्निकाजाजीमरिचैर्द्विगुणोत्तरा ॥ मातुलुंगरसैः पिष्टा टैगु

प२

कामिवच्छूलहृत्॥२॥शुक्ताम्लवेतसव्योषयवानीलवणत्रिकैः॥बीजपूररसोपेतैर्गुटिकावातशूलनुत्॥३॥बिल्वैरण्डतिलैः र्वत्वागुटिकासो ष्मं पिबेत्॥वातशूलोपशान्त्यर्थं प्रमष्टा दुष्टया तया॥४॥पिप्पलीपीप्पलीमूलचव्यचित्रकनागरैः॥यवागूः पेनीयास्यात्सूलघ्नीचोपसाधिता॥५॥सहिंगुतुंबरव्योषयवानिचित्रकानयाः॥ससारलवणैश्चूर्णं पिबेत्प्रातः सुखांबुना॥६॥विण्मूत्रानिलशूलघ्नं पाचनं वह्निदीपनं॥बिल्वमूलमथैरण्डं चित्रकं विश्वभेषजं॥७॥हिंगुसैंधवसंयुक्तं सद्यःशूलनिवारणं॥निर्दग्धिकाद्वहतोच्च कुशकासेक्षुबालिका॥८॥श्वदंष्ट्रैरण्डमूलानि वारिणा सह पाचयेत्॥पिबेत्सशर्करा क्षौद्रं शूलेपित्तानिलात्मके॥९॥त्रायमाणं सयष्ट्याह्वं वाथलक्ष्मण उद्धृता गोक्षुरो॥शूलंत्रीणिपिबेत्तोयं सगुडक्षौद्रशर्करं॥१०॥पित्तासृग्दाहशूलघ्नं सद्यो दाहज्वरापहं॥त्रिफलारिष्टयष्ट्याह्वकटुकारग्वधैः समं तं॥११॥पाययेन्मधुसंमिश्रं दाहशूलोपशान्तये॥त्रिफलारग्वधं क्वाथसक्षौद्रं शर्करान्वितं॥१२॥पाययेद्रक्तपित्तघ्नं दाहशूलनिवारणं॥त्रायमाणरसं क्षौद्रयुक्तं प्रातः पिबेन्नरः॥१३॥दाहशूलोपशान्त्यर्थं सर्वपित्तामयापहं॥पटोलत्रिफलारिष्टैः शृ

शो१

॥८॥

श्री २

॥८॥

तंक्षोद्रयुतंपिबेत्॥९४॥पित्तश्लेष्मज्वरछर्द्दिदाहशूलोपशांतये॥धान्यारसंविदार्यावात्रायंतीगोस्त
नांबुना॥९५॥पिबेत्सशर्करांक्षौद्रंपित्तशूलविमर्द्दनं॥सौवर्चलंदाडिमंचतथाहिंगवम्लवेतसं॥९६॥
महौषधंचपीताग्निनानायंसयपतंत्रकं॥कंबलावत्तदेहस्यप्राणायामंविकुर्वत॥९७॥कटुतैलोत्तं
सक्तूनांधूपमूर्छनिवारणं॥शंखचूर्णसलवणंसहिंगुव्योषसंयुतं॥९८॥उष्णोदकेनतत्सीतंशूलं
हंतित्रिदोषजं॥गोमूत्रसिद्धमंडूरंत्रिफलाचूर्णसंयुतं॥९९॥विलिहन्मधुसर्पिभ्यांशूलंहंतित्रि
दोषजं॥तीक्ष्णायश्चूर्णसंयुक्तंत्रिफलाचूर्णमुत्तमं॥१००॥प्रयोज्यंमधुसर्पिभ्यांवानशूलनिवा
रणं॥मस्त्राम्लपाचितांशुष्कांलोहचूर्णसमन्वितं॥१॥सगुडामभयांदद्यात्सर्वशूलोपशांतये॥त्रि
फलायास्तथाधान्यास्चूर्णंवाकाललोहजं॥२॥शर्कराचूर्णसंयुक्तंसर्वशूलेप्रलेहयेत्॥त्रिफला
क्वाथंगोमूत्रक्षौद्रक्षीररसोपथ्यकं॥३॥एरंडतैलद्विगुणेहितंशस्येविरेचनं॥शंबूकजंभस्मपीतं
जलेनोष्णेनतत्क्षणात्॥४॥पक्तिजंविनिहंत्याशुशूलंविष्णुरिवासुरान्॥शंबूकंमूषणंचैवपंचैव
लवणानिच॥५॥समांशागुटिकाबद्धाकलंबुकरसेनवा॥प्राग्भोजनकालेवाभक्षयीतयथाबलं॥६॥

॥८५॥

शूलाद्विमुच्यते जंतुः सहसा परिणामजात् ॥ एरंडवन्हिशंखूकवर्षाभूगोक्षुरं समं ॥ ७ ॥ अंतर्दग्ध्वापि
बेदद्भिरूल्मानिः शूलशांतये ॥ यः पिबति ससरात्रं सक्तुनैकान् कुलाथयूषेण ॥ ८ ॥ स जयति परिणामा
शूलं चिरजामपि द्विमुनन्नूतनजां समाधिगुडं सर्पिः प्रस्थं क्षीरं चतुर्गुणं ॥ ९ ॥ पक्त्वा पीत्वा जयत्या
शु पक्तिजं शूलमुद्धतं ॥ सम्विन्नं हि तुलार्द्धं स्याद्द्राहं कुष्मांडकात्सुरवं ॥ १० ॥ निष्पीड्य मुदकं तेन
प्रस्थं स्वामलकीरसं ॥ खंडस्य च तुलार्द्धं स्यात्प्रस्थार्द्धं सर्पिषो भवेत् ॥ ११ ॥ चूर्णीकृतं च कुडवं पि
प्पली परिणामकं ॥ मरिचस्य पलं चैव शुंठी द्विपलसंयुतं ॥ १२ ॥ तालीसपत्रं धान्यं च चतुर्जातं स
मुस्तकं ॥ कर्षप्रमाणं तु द्राक्षां प्रस्थार्द्धं मधुना सह ॥ १३ ॥ सर्वशूलापहं श्रेष्ठं परिणामकृतं तथा ॥
वातपित्तकृतान् रोगान् श्वासकासापहं परं ॥ १४ ॥ हत्शूलमम्लपित्तं च हन्यात् शूलं सुदुस्तरं ॥ खंडं च द्वि
पिबेत्प्राज्ञो रसायनमिदं महत् ॥ १५ ॥ षडसामलकी नाम्ना कृष्णात्रेयेण पूजिता ॥ वमनं लंघनं स्वेदः
पाचनं फलवर्त्तयः ॥ १६ ॥ क्षारचूर्णनिगुटिकाः सम्यं ते शूलनाशनाः ॥ ॥ इति वृंदे शूलापतंत्राधिका
रो नाम षड्विंशोऽध्यायः ॥ ॥ अथानाहोदावर्त्तचिकित्सितं व्याख्यास्यामः ॥ ॥ श्यामदंतीद्रवंतीसु

॥८५

क्रमहाश्यामामन्तानवन्॥ सप्तलाशंखिनीश्वेताराजवृक्षः सतिल्वकः॥१७॥ कंपिल्लकंकरंजश्चहे
मक्षीरीत्ययंगणः॥ उदावर्त्तोदरानाहविषगुल्मविनाशनः॥१८॥ तयल्लक्ष्णाहरीतक्यो द्विचतुःसंचभा
गिकाः॥ गुटिकागुडतुल्यास्ताविड्विबंधगदापहाः॥२०॥ नवद्धरीतकीश्यामास्नुहीक्षीरेणभावये
त्॥ वर्तिकामूत्रपीतास्ताः श्रेष्ठास्वानाहभेदिकाः॥२१॥ हरीतकीयवक्षारंपीलूनिबृहतीतथा॥ घ
तन्मष्टमिदंपेयमुदावर्त्तविनाशनं॥२२॥ हिंगुमाक्षीकसिंधूत्थैः पथ्यावर्त्तिसुवर्तिनां॥ घृताभ्यक्तां
गुदेदद्यादुदावर्त्तविनाशनं॥२३॥ मदनंपिप्पलीकुष्ठंवचागौराश्चसर्षपाः॥ गुडक्षारसमायुक्ताफ
लवर्त्तिः प्रशस्यते॥२४॥ आनाहेगुदशूलेच अम्लमूलैमेचच॥ राठधूमगुडव्योषगुडमूत्रेर्विपाचि
ताः॥२५॥ गुदेगुष्ठसमावर्त्तिर्विबंधानाहशूलनुत्॥ आगारधूमंपिप्पल्योमदनंराजसर्षपाः॥२६॥
गोमूत्रपिष्टसगुडाफलवर्त्तिःप्रशस्यते॥ निपाच्यमूत्राम्लमधूनिदंतीपिंजीनकृष्णागुडधूमकुष्ठैः॥
वर्त्तिः करांगुष्ठनिभांघृताक्तांगुदेरुजानाहहरींविदध्यात्॥२७॥ वाद्यंयूषेणपिप्पल्यामूलकानांसैर
सेनच॥ कुल्माषास्निग्धामुदावर्त्ताद्वातगुल्मात्प्रमुच्यते॥२८॥ ॥इत्यानाहोदावर्त्ताधिकारः सप्तविंशतितमः॥

॥ अथ गुल्मचिकित्सितं व्याख्यास्यामः ॥ ॥ मातुलुंगरसो हिंगु दाडिमं बिडसैंधवं ॥ सुरामं
डेन पातव्यो वातगुल्मरुजापहं ॥ २९ ॥ वचाभयाविडंगसुंठी हिंगु कुष्ठाग्निदीप्यकान् ॥ द्वित्रिष
ट्चतुरेकाष्टसप्तपंचांशकाः क्रमात् ॥ ३० ॥ चूर्णमद्यादिभिः पीतं गुल्मानाहोदरापहं ॥ गुल्मार्शः
श्वासकासघ्नं ग्रहणीदीपनं परं ॥ ३१ ॥ यवानिहिंगुसिंधूत्थक्षारसौवर्चलाभयाः ॥ सुरामंडेन पा
तव्याः शूलगुल्मनिसूदनाः ॥ ३२ ॥ हिंगुत्रिकं पाठाहपुषामभया वचा ॥ अजमोदाजगंधा च तिंतीडी
काम्लवेतसौ ॥ ३३ ॥ दाडिमं पौष्करं धान्यमजाजी चित्रकं वचं ॥ द्वौ क्षारौ लवणं पंच च व्यं चैकत्र चू
र्णयेत् ॥ ३४ ॥ चूर्णमेतत्प्रयोक्तव्यमन्नपाने घनत्ययो ॥ प्राग्भक्तमथवा पेयं मद्येनोष्णोदकेन
वा ॥ ३५ ॥ हृत्पार्श्वबस्तिशूलेषु गुल्मे वातकफात्मके ॥ आनाहे मूत्रकृच्छ्रे च शूले च गुदयोनिजे ॥ ३६ ॥
ग्रहण्यर्शो विकारे च प्लीह्नि पांड्वामये रुचौ ॥ उरोविबंधे हिक्कायां कासे श्वासे गलग्रहे ॥ ३७ ॥ भावितं
मातुलुंगस्य चूर्णमेतद्रसेन वा ॥ बहुशो गुटिकाः कार्याः कार्मुकाः स्युस्ततोधिकं ॥ ३८ ॥ नागरार्द्धप
लं पिष्ट्वा द्वे पले लुंचितस्य च ॥ बिल्वसेवं गुडपलं क्षीरेनोष्णेन पाययेत् ॥ ४० ॥ वातगुल्ममुदावर्त्तं यो

॥८६॥

कू न ५

॥८६॥

निशूलंचनाशयेत्॥सौवर्चलंशृंगवेरंदाडिमंसाम्लवेतसं॥१॥स्वासहृद्रोगशमनंस्यादेतद्धिगु
पंचकं॥पाठानिकुंभरजनीत्रिवृद्दुत्रिपलात्मकं॥१॥लवणंवृक्षबीजंचचूर्णंगोमूत्रसाधितं॥
घनीभूतंचगुटिकाकृत्वाखादेद्गुल्मवान्॥२॥गुल्मप्लीहाग्निसादंचनाशयेयुरसेषतः॥हिंगु
पुष्करमूलानितुंबराणिहरीतकी॥३॥श्यामाविडंसैंधवंचयवक्षारंमहौषधं॥यवक्वाथेदशगुणेनैव
तन्घृतंसिद्धंतुपाचयेत्॥४॥तेनास्यभिद्यतेगुल्मसशूलःसपरिग्रहः॥वचाहरीतकीहिंगुसैं
धवंसाम्लवेतसं॥५॥यवक्षारंयवानीचपिबेदुष्णेनवारिणा॥एतद्धिगुल्मनिचयंसशूलंसप
रिग्रहं॥६॥भिनत्तिसप्तरात्रेणवह्निंचद्दीप्तंकरोतिच॥वातकृच्छ्रविबंधेषासमुत्पन्नेकसर्षपे॥७॥
तत्स्थायायोनिधानव्यावर्त्तयोमस्विरा॥पिबेदेरंडतैलंवावारुणीमंडमिश्रितं॥८॥तदेवतै
लंपयसावातगुल्मीपिबेन्नरः॥खादेद्वाध्याकुरान्भ्रष्टान्पूतिकान्पचक्षयो॥९॥पिबेत्तव्य
नागरवासगुडंवाहरीतकीं॥गुग्गुलुत्वत्वादेतिशर्करासैंधवंवचा॥१०॥द्राक्षारसेनतसीतंगु
ल्मभेदनमुत्तमं॥मूत्रमद्यपयोद्राक्षारसेर्वीक्ष्ययथाबलं॥पिप्पलीपिप्पलीमूलंचित्रकाजाजीसैं

सैंधवैः॥५२॥ हंतियुक्तासुरागुल्मं शीघ्रं कालेमयोजिता॥ द्राक्षाभयारसंगुल्मे पैत्तिके सगुडं पिबे
त्॥५३॥ लिह्यात्कंपिल्लकं वापिविरेकार्थं मधुद्रवं॥ शताह्वाचिरबिल्वाख्यकुदारुभार्गीकणोद्भवं॥५४॥
कल्कः पीतोहरेद्गुल्मं तिलक्वाथेन रक्तजं॥ तिलक्षारोगुडव्योषघृतभार्गीयुतोभवेत्॥५५॥ पानं
रक्तभवेगुल्मे नष्टेपुष्पेचयोषितः॥ पीतोधात्रीरसोयुक्त्या किंशुकक्षारसाधितं॥५६॥ क्षारस्त्र्यूष
णसंयुक्तामदिरावास्त्रगुल्मनुत्॥ पलाशक्षारतोयेन सिद्धंसर्पिः पिबेद्भवं॥५७॥ उष्टेर्वातोदरेयेनि
न्नेविधिनास्रग्दरेहितः॥ जलदशगुणेसाध्यं त्रायमाणाचतुःपलं॥५८॥ पंचभागस्थितंपूतं कल्कैः सं
योज्यकार्षिकैः॥ रोहिणीकटुकामुस्तात्रायमाणादुरालभा॥५९॥ द्राक्षातामलकीवीराजीवंतीचंदनो
त्पलं॥ रसस्यामलकानांचक्षीरस्यचघृतस्यच॥६०॥ पलानिपृथगष्टाष्टौसम्यग्दत्वाविपाचये
त्॥ पित्तगुल्मंरक्तगुल्मंवैसर्पिःपैत्तिकज्वरं॥६१॥ हृद्रोगंकामलंकुष्ठंहन्यादेवघृतोत्तमं॥ रसेना
मलकेक्षूणां घृतपादंविपाचयेत्॥६२॥ पथ्यापादंपिबेत्सर्पिः ससिद्धंपित्तगुल्मनुत्॥ द्राक्षां
क्षामधूकखर्जूरंविदारीसशतावरीं॥६३॥ परूषकाणित्रिफलांसाधयेत्संमितान्॥ जलाढकेपा

॥८७॥ ॥८

द्रोषेरसमामलकस्यच।।६४।।घृतमिक्षुरसंक्षीरमभयाकल्कपादिकं।साधयेत्तंघृतंसिद्धंशार्क
राक्षौद्रपादिकं।।६५।।प्रयोगात्पित्तगुल्मघ्नंसर्वगुल्मविकारनुत्।।हपुषाजाजिपृथ्वीकापिप्पली
मूलचित्रकैः।।६६।।क्षीरमूलककोलानांरसैश्चविपचेद्घृतं।।वातगुल्मारुचिश्वासशूलानाहज्वरा
र्शसां।।६७।।ग्रहणीपांडुरोगाणांघृतमेतन्निवारणं।।पूतिवक्त्रान्तिहृद्रोगैर्हाष्ठीलाग्निसादनुत्।
।।६८।।त्र्यूषणंत्रिफलाधान्याविडंगाचव्यचित्रकैः।।कल्कीकृतैर्घृतंसिद्धंसक्षीरंवातगुल्मनुत्।।६९।।
एतएवचकल्काःस्युःकषायाःपंचमूलिकाः।।द्विपंचमूलकोवाथतत्घृतंगुल्मनुत्परं।।७०।।पिप्प
लीपिचुरर्द्धोदाडिमार्द्धपलंपलं।।धान्यात्संचघृतार्थव्याकर्षक्षीरश्चतुर्गुणं।।७१।।सिद्धमेतेघृतंस
द्योवातगुल्मंचिकित्सितं।।योनिशूलंशिरःशूलमर्शांसिविषमज्वरं।।७२।।पिप्पलीपिप्पलीमूल
चव्यचित्रकनागरैः।।पलिकैःसयवक्षारैःघृतप्रस्थंविपाचयेत्।।७३।।क्षीरप्रस्थेनचासर्पिर्हंति
गुल्मंकफात्मकं।।ग्रहणीपांडुरोगघ्नंप्लीहकासज्वरापहं।।७४।।धात्रिफलानांस्वरसेशाउमेतिप
चेद्घृतं।।शर्करासैंधवोपेतंतद्धितंवातगुल्मीनां।।७५।।सयोषक्षारलवणंदशाद्दशमूलश्रितंघ

तं॥ कफगुल्मे जयस्यास्तु सहिंगुविडदाडिमं॥७६॥ रौधिरस्य तु गुल्मस्य गर्भकालव्यतिक्रमे॥ स्नि

ग्धास्विन्नशरीराय देयं स्नेहविरेचनं॥७७॥ स्नेहैरुपाचरेत्सर्वं वातगुल्ममतः परं॥ चूर्णस्यंजनस्वे

द निरूहैः स्नेहबस्तिभिः॥७८॥ ॥इति वंदे गुल्मचिकित्सितं अष्टाविंशतिमोध्यायः॥ ॥अथ हृद्रोगचि

कित्सितं व्याख्यास्यामः॥ ॥सुपुष्करायहं फलं चूर्णमत्लं महौषधं सघनं यान्चकल्कः॥ क्षाराम्लसर्पि

र्लवणे विमिश्राः स्युर्वातहृद्रोगविकर्तिकघ्नाः॥७९॥ क्वाथः कृतः पौष्करमातुलुंगपलाशभूतिसठी

सुराह्वैः॥ सनागराजाजिवचायवानि सक्षारउष्णो लवणश्च पेयः॥८०॥ सुंठीसुवर्चलाहिंगु दाडिमं

साम्लवेतसं॥ चूर्णमुष्णांबुना पेयं श्वासहृद्रोगशांतये॥८१॥ कुष्ठासठी वचारास्ना सुंठी पथ्यास्सयो

करं॥ चूर्णितावास्तनामूत्रे पातव्याः कफहृद्रुदा॥८२॥ त्रिदोषजं घ्नेन पूर्वं यथावस्थाक्रियामताः॥ व

मिजे च पिबेन्मूत्रं विडंगाभयसंयुतं॥८३॥ सेककाले पाहिमाः पैत्ते मधुरैश्च विरेचनं॥ पिष्टावाकटुका

पेया सयष्टीका सितांबुना॥८४॥ अर्जुनस्य च वा सिद्धं क्षीरं योज्यं हृदामये॥ सितया पंचमूल्या वा

नलया मधुकेन वा॥८५॥ स्थिरादिकल्कितं सर्पिः क्षीरेण क्षुरसेन वा॥ द्राक्षा रसेन वा पक्वं पित्त

क्र ५

॥८८॥

॥८९॥

हृद्रोगनाशनं ॥ ६ ॥ जीवकर्षभकौ द्राक्षा श्रेयसी शर्करा बला ॥ द्वे मेदे द्वे च काकोल्यौ खर्जूरं नीलमुत्पलं ॥
॥ ७ ॥ घृतप्रस्थं पचेदेभिस्तुल्यांशैर्माहिषं भिषक् ॥ चतुर्गुणेन पयसा पातव्यं युक्तितश्च तत् ॥ ८ ॥ वा
तपित्तसमुत्थायं नमेतहृद्रोगनाशनं ॥ श्वदंष्ट्रोशीरमंजिष्ठाबलाकाश्मर्यकत्तृणं ॥ ९ ॥ दर्भमूलं पृ
थक्पर्णी पलाशर्षभकौ स्थिरा ॥ पिप्पलिकान्साधयेत्तेषां रसे क्षीरचतुर्गुणे ॥ १० ॥ कल्कैः स्वगुप्तर्षभ
कमेदेजीवंतिजीवकैः ॥ शतावर्यर्द्धिमृद्वीकाशर्कराश्रावणिविषैः ॥ ११ ॥ प्रस्थः सिद्धो घृताद्वातपित्ताहृद्रोग
गुल्मनुत् ॥ मूत्रकृच्छ्रप्रमेहार्शकासश्वासक्षयापहः ॥ १२ ॥ धनुःस्त्रीमद्यभाराध्वखिन्नानां बलमांस
तः ॥ कसेरुकाभिर्बलशृंगवेरप्रपौंडरीकंमधुकंबिशास्पा ॥ १३ ॥ पंचभिश्च सर्प्पिः पयसा पक्वैस्तैः क्षौद्रान्वि
तं पित्तहृदामयघ्नं ॥ पथ्यादशांशं याकल्कं सौवर्चलपलद्वयं ॥ १४ ॥ घृतप्रस्थं जले सिद्धं हृद्रोगश्वासगुल्म
नुत् ॥ पुनर्नवादारुसपंचमूलं रास्नायवचातृकोलकुलत्थबिल्वं ॥ पक्त्वा जलेन तेन पचेत्तु तैलमभ्यंगपानैर्नि
लं हृद्गदघ्नं ॥ १५ ॥ ॥ इति वृंदे हृद्रोगचि० एकोनत्रिंशोध्यायः ॥ ॥ अथ मूत्रकृच्छ्रचिकित्सितं व्याख्या
स्यामः ॥ ॥ शतावरीकाशकुशश्वदंष्ट्राविदारिशालीक्षुकसेरुकाणां ॥ क्वाथं सुशीतं मधुशर्कराभ्यां यु

179

कांपिबेत्सैतिकमूत्रकृच्छ्री॥९७॥वारुबीजमधुकंसदार्व्यपैत्ते पिबेत्तंदुलधावनेन॥दार्व्यातथैवामलकी
रसेनसमाक्षिकांपित्तिनवेथकृच्छ्रे॥९८॥हरीतकीगोक्षुरराजवृक्षपाषाणभिद्धन्वयवासकानां॥क्वाथं
पिबेन्माक्षिकसंप्रयुक्तंकृच्छ्रेसदाहेसरुजेविबंधे॥९९॥मूलानिकाशाकासेक्षुरशराणांचेक्षुपालिका॥
मूत्रावातास्मरीकृच्छ्रेपंचमूलीतृणंनिका॥२००॥यवोबूरुकृतणपंचमूलैःपाषाणभेदैःशासताच
रीभिः॥कृच्छ्रेषुगुल्मेषुमयाविमिश्रैःकृतःकषायोगुडसंप्रयुक्तः॥१॥मंथंपिबेद्द्राससितंससर्पिमिश्र
तंपिबेत्पर्वोवार्द्दसिताप्रयुक्ताः॥धात्रीरसंचैवसितापिबेद्वाकृच्छ्रेसरक्तेमधुनाविमिश्रं॥३॥एर्वारुबिज
यष्ट्याव्हदार्विचातंदुलांबुना॥मुत्रेणसुरयावापिकदलिस्वरसेनवा॥४॥कृच्छ्रविनाशायश्लक्ष्ण
पिष्टंतदिपिबेत्॥५॥तक्रेणयुक्तंसितिमारकस्यबीजंपिबेत्कृच्छ्रविघातहेतो॥पिबेत्तथातंदुलधाव
नेनप्रवालचूर्णंकफमूत्रकृच्छ्रे॥६॥ससघदारगवधकोरुकालाविधेःकुरंजकुरजोगरूची॥७॥संध्यां
जलेनविपिबेद्यवागूसिद्धंकषायंमधुसंयुतंवा॥निर्दग्धिकायाःस्वरसंप्रतंमधुविमिश्रं॥८॥मूत्रदो
षहरंपीत्वानरःसंपद्यतेसुखी॥एर्वारुबीजकल्कश्चश्लक्ष्णंपिष्टाक्षसंमितं॥९॥धाण्याम्ललवणेपे

॥१८५॥

॥१८८॥

ते

१८०

योः मूत्रकृच्छ्रविनाशनः॥ दाडिमाम्लयुतां हृद्यां सुंठीजीरकसंयुतां॥८॥ पीत्वा सुरां सलवणां मूत्रकृच्छ्रे
समुच्यते॥ अभ्यंजनस्नेहनिरूहबस्तिश्चैव पनाहोत्तरबस्तिसेकात्॥९॥ स्थिरादिभिर्वातहरैश्च
सिद्धान् दद्याद्रसांश्चानिलमूत्रकृच्छ्रे॥ कषायोतिबलामूलसाधितो मूत्रकृच्छ्रजित्॥१०॥ पीतं वात्र
पुसीबीजं सलिलं त्र्यूषयथोन्वितं॥ द्राक्षासितोपली कल्कं कृच्छ्रघ्नं मधुनाद्रुतं॥११॥ पिबेद्वा क्रामतः क्षी
रमुष्णं गुडसमायुतं॥ सिजाजश्च नृभिर्हूर्वा गुठीनावा बेद्रजः॥१२॥ हरिद्रां मधुकं मूर्वां मुस्तं क्वदे
वदारु च॥ पिबेदक्षसमान् कल्कान् यसा मूत्रपीडिता॥१३॥ शर्करासयवक्षारा सर्वकृच्छ्रप्रभेदनी॥
त्रिफलां श्लक्ष्णपिष्टां वा कल्कं वा कोलसंमितं॥१४॥ वारिणा लवणीकृत्य पिबेन्मूत्ररुजापहं॥ बृहती
धावनि पाठा यष्टीमधु कलिंगकाः॥१५॥ पाचनीयो बृहत्यादि कृच्छ्रदोषत्रयापहः॥ लेहः शुक्रविबंधो
त्थे शिलाजितु समाक्षिकः॥ वृष्योबृहित्र धातोश्च विधेयाः प्रमदोत्तमाः॥ बलहिंगुयुतं क्षीरं सर्पिर्मि
श्रं पिबेन्नरः॥१७॥ मूत्रदोषविशुद्ध्यर्थं शुक्रदोषहरं च तत्॥ शतावरीकाशकुशश्वदंष्ट्राविदारिकेक्षुका
मलकेषु सिद्धं॥१८॥ सर्पिः पयो वा सितया विमिश्रं कृच्छ्रेषु पित्तप्रभवेषु योज्यं॥ ॥इति मूत्रकृच्छ्रचि
योज्यं

(८)

क्रिसितंत्रिंशतमोध्यायः॥ ॥अथमूत्राघातचिकित्सितंव्याख्यास्यामः॥ ॥सदाभद्रारमभिन्मूलंत्र
तावर्यीःसमित्रकं॥रोहिणीकोकिलाख्योन्कोंचसपूलात्रिकंटकं॥१७॥श्लक्ष्णपिष्टासुरापिनामूत्राघा
तप्रबोधनं॥निर्दग्धिकायास्वरसंपिबेद्वातानवमूतं॥२०॥जलकुंकुमकल्कंवासक्षौदमुखितंनि
शि॥सतैलंपाटलीभस्मक्षारचद्वापरिस्रुतं॥२१॥श्रितंशीतंपयोमांसीचंदनंतंदुलांबुना॥पिबेत्स
शार्करंस्रेष्टसोष्णवातेसशोणिते॥२२॥दद्यादुत्तरबस्तिंचमूत्राघातेसवेदने॥त्रिकंटकैरंडशताव
रीषुसिद्धंपयोवातृणपंचमूलं॥२३॥गुडप्रगाढंसघृतंपयोवारोगेषुकृच्छ्रादिषुसिद्धमेतत्॥त्रि
लोड्डिदैरंडकुशाःस्थिरादिपुनर्नवाभिस्रुयचेषुसिद्धं॥२४॥तैलंघृतंक्षीरमथानेनकालेषुकृच्छ्रा
दिषुसंप्रयोज्यं॥त्रिकंटकैरंडकुशाध्यभीरुकर्कारुकैर्वारुरसेनसिद्धं॥२५॥सर्पिर्गुडार्धंशियुतंप्रपे
यंकृच्छ्राश्मरीमूत्रविघातदोषे॥चित्रकंसारिवाचैवबलाकालानुसारिवा॥२६॥क्षुद्रंविशांपिप्प
ल्यतथ्याचत्रिफलाभवेत्॥तथैवमधुकंदद्यादद्यादामलकानिच॥२७॥घृताटकंपचेदेतैःकल्कैरक्ष
समन्वितैः॥क्षीरद्रोणेजलद्रोणेनसिद्धमवतारये॥शीतेपरिस्रुतंचैवशार्करप्रस्थसंयुतं॥२८॥

॥१०॥ पा५ ॥१० ना३

८४

तुगाक्षीर्यश्च तत्सर्वं मतिमान्प्रति मिश्रयेत् ॥ ततोमित्तं पिबेत्काले यथादोषं यथाबलं ॥ २९ ॥ वातरेता
पित्तरेताश्लेष्मरेताश्चयोनवेत् ॥ स्क्ररेताग्रंथिरेपि पिबेदघ्नरोगिणः ॥ ३० ॥ जीवनीयँदसंचसर्पिरे
तन्महाबलं ॥ प्रजाहितंच धन्यंच सर्वरोगापहं शिवं ॥ ३१ ॥ सर्पिरेतत्प्रयुंजानास्त्रीगर्भंलभेतचिरात् ॥
अस्त्रग्दोषाज्जयेच्चापि योनिदोषांश्च संहितान् ॥ ३२ ॥ मूत्रदोषेषु सर्वेषु कुर्यादेतच्चिकित्सितं ॥ ३३ ॥
॥ इति मूत्राघातचि० ॥ एकत्रिंशोध्यायः ॥ ॥ अथाश्मरीचिकित्सितं व्याख्यास्यामः ॥ ॥ वीरवृक्षो
ग्निमंथश्च कासवृक्षादनीकुशाः ॥ मोरटेंदीवरीस्तर्यं भक्काटिंटूकगोक्षुराः ॥ ३४ ॥ वस्तुकोशीरोदर्भ
शिरयावरमभेदकः ॥ अश्मरीशर्कराकृच्छ्रमारुतार्तिहरोगणः ॥ ३५ ॥ सुव्यमाग्निमंथापामार्गः शियुर्व
रुणगोक्षुरैः ॥ अजयाखधफलैः क्वाथं कुर्याद्विचक्षणः ॥ ३६ ॥ रामटक्षारलवणैश्चूर्णं दत्वा पिबेन्नरः ॥
अश्मरीमूत्रकृच्छ्रघ्नं दीपनं पाचनं परं ॥ ३७ ॥ अन्यात्क्लोष्टाश्रितं वार्चकयूरूगदभेदजं ॥ नागरवरुण
कगोक्षुरपाषाणभेदकपोतचकृतः क्वाथः ॥ गुडयवाचशुकविमिश्रैः पीतोहंत्यश्मरीमुग्रं ॥ ३८ ॥ एका
पकुल्यामधुकाश्मभेदकौंतीश्वदंष्ट्रावृषकोरुबुकैः ॥ शृतं पिबेदश्मजप्रधानं सशर्करैसाश्मरिमूत्र

कृच्छ्रे ॥ ७० ॥ पिबेद्वरुणमूलस्य क्वाथं च कल्कसंयुतं ॥ क्वाथश्च शिग्रुमूलोत्थः कदुष्णोऽश्मरिपातनः ॥ ७१ ॥
मूलं श्वदंष्ट्रेक्षुरकोरुबूकात् क्षीरेण पिष्टं बृहतीद्वयं च ॥ आलोड्य दध्ना मधुरेण पेयं दिनानि सप्ताश्मरि
भेदनार्थं ॥ ७२ ॥ त्रिकंटकस्य बीजानि चूर्णं माक्षिकसंयुतं ॥ अविक्षीरेण सप्ताहं पेयमश्मरिभेदनं ॥ ७३ ॥
भार्गीपुष्करमूलं वा प्पक्षमात्रं पिबेन्नरः ॥ मूलं कपोतवंकाय पिबेदम्लसुरादिभिः ॥ ७४ ॥ हिंस्राखरा
ह्वासितिवारकणाभिर्वारुकाप्यत्रपुसाश्च बीजं ॥ उपकुंचिकाहिंगुसवेतसाम्लं स्याद्बृहत्यौ हपुषा
प वचा यच ॥ ७५ ॥ चूर्णं पिबेदश्मरिभेदि पक्वं सर्पिश्च गोमूत्रचतुर्गुणं चेत् ॥ शृंगवेरयवक्षारपथ्याका
लीयकान्वितं ॥ ७६ ॥ दधिमंडेन स्त्यामश्मरीमस्तुपानतः ॥ रक्तोद्भवेनोत्पलमूलिका शोक्षुवालिका
॥ ९१ ॥ गोक्षुरशोदकानिः ॥ ७७ ॥ पिबेत्सिताक्षौद्रयुतां निरवादो द्विदारिमिक्षुत्रपुषाणि चैव ॥ यवक्षारगुडो ॥ ९१
न्मिश्रं रसं पुष्पफलोद्भवे ॥ ७८ ॥ पिबेन्मूत्रविबंधघ्नं शर्करा स्मरि भेदनं ॥ —— शर्करारुबुक
द्विकं टकारिक्षरकाकमूलं ॥ ७९ ॥ पिबेत्क्षीरसुपिष्टं मे तत्स्याद्भेदनार्थं शिवाश्मरीणां ॥ ८० ॥ पि
चुकाकोलुकचकशाकें दीवरजैः फलैः ॥ चूर्णितैः सगुडं तोयं शर्करानाशनं पिबेत् ॥ ८१ ॥ तैलापामा

गोकदलीपलाशानां च बिल्वजः॥ क्षारः पेयो विमूत्रेण शर्कराश्मरिनाशनः॥५२॥ पुनर्नवायोरजनीश्व
दंष्ट्रा फल्गुप्रवालाश्च सदर्भपुष्पाः॥ क्षारांबुमध्येक्षुरसैश्च पिष्टः पेयं नवे दश्मरिशर्करासु॥५३॥ सर्व
थैवोपयुज्यस्तृणगणो विगतरादिकः॥ घृतैः कल्कैः कषायैश्च क्षीरैश्चोत्तरबस्तिभिः॥५४॥ शरादिपंच
मूल्यावा कषायेण पचेद्घृतं॥ प्रस्थं गोक्षुरकल्केन सिद्धं दद्यात्सशर्करं॥५५॥ अश्मरीमूत्रकृच्छ्रघ्नं रेतो
मार्गरुजापहं॥ घृतं श्वदंष्ट्रास्वरसेन सिद्धं क्षारेण चैवां गुणेन पेयं॥५६॥ स्थिरादिकालतकषायक
नामैकैकं विधिरेचनेन॥ कुलत्थसिंधूत्थविडंगसारं सशर्करं शीतलयावशूकं॥५७॥ बीजानि कू
ष्मांडकगोक्षुराभ्यां घृतं पचेत्तद्वरुणस्य तोये॥ दुःसाध्यसर्वाश्मरिमूत्रकृच्छ्रं मूत्रस्यकृच्छ्रं रसजं च मू
त्रं॥५८॥ एतानि सर्वाणि निहंति शीघ्रं प्ररूढवृक्षानिव वज्रपातः॥ कुशाग्निमंथशैरेयनलदर्भेक्षुगो
क्षुराः॥५९॥ कपोतवंककवस्कष्ठवशीरेंदीवरीशराः॥ धातक्यरलुवंदाका कर्णपूराश्मभेदकाः॥६०॥ एषां
कल्ककषायाभ्यां सिद्धं तैलं प्रयोजयेत्॥ पानाभ्यंजनयोगेन बस्तिनोत्तरबस्तिना॥६१॥ शर्कराश्म
रिरोगेषु मूत्ररोगेषु दारुणे॥ प्रदरे योनिशूले च शुक्रदोषे तथैव च॥६२॥ वंध्यागर्भमिदं प्रोक्तं लभेत लु
तै

शावा८

॥९२॥

श्रादिकं॥ त्वक्पत्रफलमूलस्य वरुणस्य त्रिकंटकात्॥ ९३॥ कषायेण पचेत्तैलं बस्तिमास्थापनेन च॥
शर्कराश्मरीशूलघ्नं मूत्रकृच्छ्रविनाशनं॥ ९४॥ सैंधवार्द्धं च यत्तैलं भिषग्भिः परिकल्पितं॥ तत्तैलं द्वि
गुणक्षीरं पचेद्वीरतरादिना॥ ९५॥ क्वाथेन पूर्वकल्केन साधितं तु भिषग्वरैः॥ एतत्तैलवरं श्रेष्ठम
श्मर्णां निवारणं॥ ९६॥ मूत्राघाते मूत्रकृच्छ्रे पच्यते मथितेन तथा॥ नग्नेऽश्मामभिन्नेच सर्वथैव प्र
शस्यते॥ ९७॥ मदनागारधूमाभ्यां कटुका [illegible] गुञ्ज सैंधवैः सघ्जाफल - - - - - - - - - -

॥९२॥

186

अथ प्रमेहस्य ग्रंथांनरात्॥ ॥अश्वत्थं च नवबृहत्यात्रे बहुमूत्रत्वमेव च॥शोषः संतापकार्श्ये च मूत्रमेहस्य लक्षणं॥१॥मूत्रं शुक्रप्रभं यस्मिन् मेहने शुक्रलक्षणं॥मधुमेहे भवेन्मूत्रं क्षौद्राभं मक्षिकाश्रितं॥२॥रक्तवर्णं यदा मूत्रं रक्तमेहस्य लक्षणं॥तत्प्रमेहे तदा विंद्यात् मूत्रं तक्रप्रभं यदा॥३॥पारदस्य पलं द्वे तु चत्वारि गंधकस्य च॥लोहाभ्रस्वर्णमाक्षीकनागवंगाः पलोन्मिताः॥४॥सर्वं तद् द्वालुकायंत्रे पचेन्मर्द्दयेन्नाग्नि त्वणं॥ कांतिकुमारीमंडूकी भृंगराजरसैः सह॥५॥पुनरालोड्य पलेन पचेद् यामं वन्हिना॥एषः सिद्धरसो ज्ञेयः सर्वांन्मेहान्निरंचति॥६॥चक्षुरोगान् मूत्रकृच्छ्रं पांडुमामानिलक्षयं॥शिरोर्त्तिकामलारोगं सवितास्तनोरहिते॥७॥पुनर्नवायाः पिप्पल्याश्चूर्णस्य मधुनं चटिं॥ स्त्रीकान्तक्षयेत्प्रातः प्रमेहस्य विनुत्तये॥८॥लज्जावतिहरिद्रे द्वे पृथिव्यामलकी तथा॥ रत्वाचूर्णमनी पातु नक्षयेन्मेहशांतये॥९॥ विनुन्नतं जीकेरे युग्मयुक्तं नुक्तं नणां मेहहरं न दुष्कं॥ बलप्रदं पित्तविकारहारी सुरोत्तनं कक्क विकारवारी॥१०॥पलमाणेन तिलान् प्रभाते मूत्रप्रमेही प्रतिघस्त्रमत्ति॥ स स्त्रीवृत्तं कामयते न बलो डितैल्लेन साकं रजनीरजन्यां॥११॥ फलत्रिकं पिप्पलिमूलचित्रकं त्रिकंटकं फाकनागकेसरं॥ मुस्तास्त्वगेलाश्च विडंगचित्रं

प्र २

187

।कान्लवेतसंवर्चाक्त्वास्वगुसावरजीरकंच॥१२॥सुर्तन्नेडीकं मुस्ताली विडंगंसदाम[illegible]चक्ररोचनंच॥तु
रंगगंधातुसमाक्षिकंच सर्वाणिचैतानिसमानिकुर्यात्॥१३॥शुद्धं ततःपंचगुणंचलोहंसचूर्ण्यचैवक्र
त्रसमस्तमेतत्॥विनावयेद्भृंगरसेनपश्चात्सन्नाद्रारागोस्तनिकारसेन॥१४॥धात्रीजगद्भेषजयोरसे
नजानस्ततोविंशतिमेहहंता॥रसोनयोज्योहिसदानराणांक्षौणसार्द्धतुवटिविधेया॥१५॥सहंग
द्रव्याहिघृतेनशीतेनवर्षासुलोहेनसमंप्रदद्यात्॥षंडेनयुक्तंच[illegible]कालेमहस्यनात्रायाभिषद्भि
रुक्तं॥१६॥अस्नेहान्राजमाषान्योनिस्यमश्नातिमेहवान्॥मूत्रमेहोदिनैस्तस्यस्वल्पैर्यातिध्रुवंक्षयं
॥१७॥पुष्करंपिबतियोरुणोदयेनक्षयेत्तदनुपूतनानिशि॥तस्यमेहउपयातिदूरतोविष्णुपूजनवि
धेरिवाघथा॥१८॥लिह्यात्क्षमधुनानस्मवंगस्यशुक्रमेहके॥मधुमेहेपिभस्मेदंमर्द्दटीचूर्णसंयुतं॥१९॥
श्लेष्मांतकस्यकाथेनरक्तमेहोनिवर्त्तते॥अथवाबीजकाष्टस्यक्काथंवालंयुतापिबेत्॥२०॥ ॥इति
प्रमेहचिकित्सासमासः॥ ॥अथांत्रवृद्धिचिकित्सितंव्याख्यास्यामः॥ ॥रास्नायष्ट्यामृतैरंडपटो
लरेचतंबला॥वषश्चोत्क्षथितोवृद्धिहन्याश्चित्रकृतैलवान्॥२१॥मष्टश्चैरंडतैलेनकल्कःपथ्या

॥१९॥ चेये

॥१९

समुद्भवा॥ मूत्रसैंधवसंयुक्तो वृद्धिरोगहरः परः॥२७॥ हरीतकीमूत्रसिद्धां सतैललवणान्वितां॥ प्रातः प्रातश्च सेवेत्तु कफवातमयापहं॥२८॥ सक्षीरं वा पिबेत्तैलं मासमेरंडसंभवं॥ गुग्गुलं वैरंडतैलं वा गोमूत्रेण पिबेन्नरः॥२९॥ वातवृद्धिं निहंत्याशु चिरकालानुबंधिनीं॥ त्रिफलाक्वाथगोमूत्रं पिबेत्प्रातरतंद्रितः॥३०॥ कफवातोद्भवं हंति श्वयथुं वृषणोत्थितं॥ त्र्यूषणं पिप्पलीमूलं देवदारु फलत्रिकं॥३१॥ कषायं पाययेद्देषां सक्षारलवणत्रयं॥ विनिर्मांसि प्रशाम्यंति वृद्धिर्वातकफात्मकः॥३२॥ अंगुष्ठमध्ये [illegible] दहेद्वांगविपर्यये॥ लेपनं कटुरूक्षोष्णं स्वेदनं भक्षमेव च॥३३॥ परिषेकावगाहाश्च सर्वमुष्णमिहेष्यते॥ वचासर्षपकल्केन प्रलेपः शोफनाशनः॥३४॥ सरलागरुकाष्ठानि देवदारु महौषधं॥ मस्तारनालसंपिष्टं शोफघ्नं कफवातजित्॥३५॥ चंदनं मधुकं पद्ममुशीरं नीलमुत्पलं॥ क्षीरपिष्टैः प्रदेहः स्याद्दाहशोफरुजापहः॥३६॥ पंचवल्कलकल्केन घृतेनापि प्रलेपनं॥ सर्वं पित्तहरं कार्यं रक्तजे रक्तमोक्षणं॥३७॥ शंखोपरि च कर्णांते त्यक्त्वा सेवनिमादरात्॥ व्यत्यासाद्वा सिरां विध्येदंत्रवृद्धिनिवर्तये॥३८॥ लाक्षाकरजबीजं च सुंठी दारु सगैरिकं॥ कुंदरं च समं कृत्वा चूर्णयेन्मतिमान्भिषक्॥३९॥

कांजिकेनतुसंपिष्यसुखोष्णेनप्रलेपयेत्॥अंत्रवृद्धिहरोह्येषतथाप्यथुनाशनः॥१७॥तैलमेरंडजं
पिबाबलासिद्धंपयोन्वितं॥आध्मानशूलोपचितामंत्रवृद्धिंजयेन्नरः॥१८॥पुनर्नवामृतादारुसक्षार
लवणत्रयं॥कुष्टंसठीवचामुस्तंरास्नाकफलपुष्करं॥१९॥यवानीहपुष्पाहिंगुशुनाल्हावाजमोदकाः॥
विडंगातिविषायष्टीपंचकोलकसंयुतैः॥२०॥एतैरक्षसमैःचूर्णैःतैलप्रस्थंविपाचयेत्॥गोमूत्रंद्वि
गुणंदेयंकांजिकंचतथैवच॥२१॥पुनर्नवाघृमेतत्तुवस्तौपानेतथोत्तमं॥शार्ङ्गरात्रमरिश्मूलघ्नंमूत्र
त्रकृच्छ्रविनाशनं॥कट्यूरुपृष्ठमेंढ्रेषुकुक्षौचवंक्षणाश्रिते॥कफवातोद्भवंशूलमंत्रवृद्धिविनाशयेत्
॥२२॥ ॥इतिवृद्धिचि०एकत्रिंशतितमोध्यायः॥ ॥अथगलगंडमालाग्रंथ्यर्बुदचिकित्सितंव्याख्यास्या
मः॥ ॥निचुलंशिग्रुमूलानिदशमूलमथापिवा॥अलेपनंवातगंडेसुखोष्णंसप्रशस्यते॥१॥देव
दारुविशालेचकफगंडेप्रलेपनं॥सर्षपान्शिग्रुबीजानिशणबीजातसीयवाः॥२॥मूलकस्यचबीजानि
तक्रेणाम्लेनपेषयेत्॥गंडानिग्रंथयश्चैवगंडमालास्तथैवच॥३॥आलेपातेनशाम्यंतिविलयं
यातिनोचिरात्॥जलकुंभीकजंभस्मपक्वागोमूत्रगालितं॥४॥पिबेत्कोद्रवतक्राशीगलगंडनिवृत्त

॥९५॥

सु० ॥९८॥ सी०

ये॥ तैलं पिबेच्चामजनिंबहिंस्राहरीतकीवत्सकपिप्पलीभिः॥५१॥ सिद्धं बलाभ्यां च सदेवदारु हितायनि
त्यं गलगंडरोगिः॥ विडंगानिलसिंधूत्थरास्नायावक्षारदारुभिः॥५२॥ तैलं चतुर्गुणं सिद्धं कटुतुंबीजले
न वा॥ गंडमालापहं श्रेष्ठं गलगंडहरं परं॥५३॥ पलमर्द्धपलं वापि पिष्टं तंडुलवारिणा॥ कांचनार
ग्बधं पीत्वा मुच्यते गंडमालया॥५४॥ गंडमालापहं तैलं सिद्धं खवोटकत्वचा॥ निंबाश्वमारनिर्गुंडी
साधितं वापि नावनं॥५५॥ छुछुंदरीविपक्वं तु तक्षणा तैलं परं ध्रुवं॥ अभ्यंगान्नाशयेन्नूनं गंडलां सुदा
रुणं॥५६॥ जिह्वाधः पार्श्वयोर्मूलात् शिराद्वादश कीर्तिताः॥ तासां स्थूले शिरे द्वे च छिंद्यात्ते च शनैः श
नैः॥५७॥ वडिशेनैव संग्रह्य कुशपत्रेण बुद्धिमान्॥ श्रुते रक्ते व्रणे तस्मिन् दद्यात्सागुडमार्द्रकं॥५८॥
भोजनं वातनिष्यंदि पूषकोलस्त्रीमिष्यते॥ सर्षपारिष्टपत्राणि दंष्ट्राभल्लातकैः सह॥५९॥ छागमू
त्रेण संपिष्टमपचीघ्नं प्रलेपनं॥ अश्वत्थंकाष्ठनिचुलं गवां दंतं च दाहरेत्॥६०॥ वाराहमज्जसंयुक्तं
नस्महत्यपचीव्रणात्॥ चंदनं सानयाल लाक्षा वचा कटुकरोहिणी॥६१॥ एतत्तैलस्रुतं पीतं समूला
मपचीं जयेत्॥ ग्रंथिमुद्धृत्य वा पक्वं वह्निकर्म प्रयोजयेत्॥६२॥ पश्चात्क्षारेण संशोध्य

व्रणवत्समुपाचरेत्॥ क्षाराग्निभ्यां दहेच्चापि भेदैश्च विधिवर्जयेत्॥६३॥ स्वल्पं कंद्रवस्तिमापाद्य पार्श्वे
श्वाद्वादशांगुले॥ मीनांडसदृशांमेदो हृत्वा वन्हीं प्रयोजयेत्॥६४॥ जयेद्विद्रधिमत्सूर्वमर्बुदं दहनादि
भिः॥ उपोदकारसाभ्यक्तात्तत्र परिवेष्टितात्॥६५॥ प्रणश्यत्यचिरान्नॄणां पिटकार्बुदजातयः॥ उपोद
काकांजिकमूत्रपिष्टात योपनाहो लवणेन सार्द्धं॥६६॥ दृष्टेर्बुदानां प्रशमाय पक्वेश्विद्विनेषु रात्रिंपिम
र्मजानां॥ हरिद्रालोध्रपत्तंगगृहधूमो मनःशिला॥६७॥ मधुप्रगाढो लेपोयं मेदोर्बुदहरः परः॥ ए
षां तामेव क्रियां कुर्याद्दोषानां शार्कराबुदे॥६८॥ ॥इति गलगंडमालाग्रंथ्यर्बुदचि॰ द्विचत्वारिंशोध्या
यः॥ ॥अथ श्लीपदचिकित्सितं व्याख्यास्यामः॥ ॥लंघनालेपनस्वेदरेचनैश्च प्रसेचनैः॥ प्रायः
श्लेष्महरैरूक्षैः श्लीपदं समुपाचरेत्॥६९॥ सिद्धार्थशोभांजनदेवदारुविश्वौषधैर्मूत्रयुतैः प्रलिंपे
त्॥ पुनर्नवानागरसर्षपानां कल्केन वा कांजिकमिश्रितेन॥७०॥ धत्तूरैरंडनिर्गुंडीवर्षाभूशिग्रुस
र्षपैः॥ प्रलेपः श्लीपदं हंति चिरोत्थमपि दारुणं॥७१॥ हंति वा लेपनेनित्यं चित्रकोदेवदारु च॥ सि
द्धार्थशिग्रुकल्कौ वा सुखोष्णो मूत्रपेषितः॥७२॥ मंजिष्ठामधुकं रास्नामहिंस्त्रां सपुनर्नवां॥ पिष्ट्वारना

सो॰

॥९५॥ ॥९५

९४ ९४

192

लेलैपोयंपित्तश्लीपदशांतये॥७३॥पिबेद्वाप्यनयाकल्कंमूत्रेणान्यतमेनवा॥पिबेद्देवंगडूचीवा
नागरंभद्रदारुवा॥७४॥पिबेत्सर्षपतैलेनश्लीपदानांनिवृत्तये॥पूतीकरंजछदजंरसंवापियथा
बलं॥७५॥अनेनैवविधानेनपुत्रजीवकजंरसं॥प्रयुंजीतभिषक्प्राज्ञःकालसात्म्यविभागवित्॥७६॥
सं४ पलाशमूलस्वरसंपिबेद्वातैलेनतुल्यंसितसर्षपाणां॥मूत्रेणपथ्यामरदारुविश्वंसगुग्गुलंश्लीप
दिभिर्निसेव्यं॥७७॥वृद्धदारुकचूर्णंवामूत्रसौवीरकादिभि॥त्रीलिनंश्लीपदंहंतिदुष्टंसंवत्सरो
त्थितं॥७८॥पिप्पलीत्रिफलादार्वीनागरंसपुनर्नवं॥नागैर्द्विपलिकैस्तेषांतत्समंवृद्धदारुकं॥७९॥
कांजिकेनतुतच्चूर्णंपिबेत्कर्षप्रमाणतः॥जीर्णेवापरिहारस्याद्भोजनंसर्वकामिकं॥८०॥श्लीपदंवातरो
गांश्चप्लीहगुल्मभरोचकं॥अग्निंचकुरुतेघोरंनस्मकंचप्रयच्छति॥८१॥कृष्णाचित्रकदंतीनांकर्षमर्द्ध
पलंपलं॥विंशतिश्चहरीतक्यागुडस्यचपलद्वयं॥८२॥मधुनासहसंयुक्तंश्लीपदंहंतिदारुणं॥
विडंगासारिवार्केषुनागरेचित्रकेतथा॥८३॥भद्रदार्व्येषुस्वकार्य्योःसर्वलवणेषुच॥तैलपक्वंपिबे वेषु
द्वापियवान्नंचहितंसदा॥८४॥सुरसादेवकाष्टंचत्रिफलात्रिकटुर्गजा॥लवणानिचसर्वाणिविडंगा

193

न्यथचित्रकं ॥८५॥ चविका पिप्पलीमूलं गुग्गुलं हपुषां वचां ॥ यवाग्रजः सपाठश्च सटयो लेवकं देवदारु
कं ॥८६॥ कल्केश्च कार्षिकैरेभिर्घृतप्रस्थं विपाचयेत् ॥ दशमूलकषायेण धान्ययूषद्रवेण च ॥८७॥
दधिमंडसमायुक्तं प्रस्थं प्रस्थं पृथक् पृथक् ॥ पक्वे तु तघृतं कल्कात् पिबेत्कर्षत्रयं हवि ॥८८॥ श्लीपदं
कफवातोत्थं मांसरक्ताश्रितं च यत् ॥ मेदःश्रिताभिवातोत्थं हन्यादेवं न संशयः ॥८९॥ अपचीगलगं
डानि अंत्रवृद्धिं तथार्बुदं ॥ नाशयेद्ग्रहणीदोषं श्वयथुं गुदजान्यपि ॥९०॥ परमाग्निकरं हृद्यं कोष्ट
कृमिविनाशनं ॥ घृतं सौरेश्वरं नाम श्लीपदं हंति सेवितं ॥९१॥ ॥इति वृंदे श्लीपदचिकित्सितं त्रयोस्त्रिं
शोध्यायः ॥ ॥अथ विद्रधिचिकित्सितं व्याख्यास्यामः ॥ ॥जलौकापातनं शस्तं सर्वस्मिन्नेव वि

॥१९६॥

द्रधौ ॥ मृदुर्विरेको लघ्वन्नं स्वेदः पित्तोत्तरं विना ॥९२॥ वातघ्नमूलकल्कैस्तु वसातैलघृतायुतैः ॥ सुखो

॥१९६

ष्णैर्बहुलो लेपः प्रयोज्यो वातविद्रधौ ॥९३॥ स्वेदोपनाहाः कर्त्तव्याः शिग्रुमूलसमन्विताः ॥ पुनर्नवाद
रु विश्वं दशमूलाभसामया ॥९४॥ गुग्गुलैरंडतैलं वापि बेन्मारुतविद्रधौ ॥ दशमूली छिन्नरुहा
पथ्या दारु पुनर्नवा ॥९५॥ ज्वरविद्रधिघ्नो पेषु शिग्रुविश्वपुनाहिताः ॥ त्रिफला शिग्रुचूर्णदशमू

क्षौं मसापिबेत्तु ॥ १६ ॥ गुग्गुलं मूत्रयुक्तं वा विद्रधौ कफसंभवे तु ॥ रक्तिकासिक्तनालोहगोमूत्रवृन्तुष
पांशुभिः ॥ १७ ॥ मूत्रैरूक्षैश्च सततं स्वेदयेच्छ्लेष्मविद्रधिं ॥ पैत्तिके सारवालजामधुकैः शर्करायुतैः ॥
॥ १८ ॥ प्रदिह्यात्क्षीरपिष्टैर्वा पयसो नीरचंदनैः ॥ पिबेद्वा त्रिफलाक्वाथं तव[illegible]ल्कसंयुतं ॥ १९ ॥ पंच
वल्कलकल्केन घृतमिश्रेण लेपनं ॥ शोभांजनस्य निर्यूहो हिंगुसैंधवसंयुतः ॥ २० ॥ अचिराद्वि
द्रधिं हंति प्रातः प्रातर्निषेवितः ॥ शिग्रुमूलं जले धौतं दरपिष्टं प्रलेपयेत् ॥ १ ॥ तद्रसं मधुना पीत्वा
हंत्यंतर्विद्रधिं नरः ॥ पिबेदम्पं नरे पथ्या यावस्तोमांजनाद्रसं ॥ २ ॥ नाराजमथ सर्पिर्म्यां तैलं
वाथो रुबूकजं ॥ अपक्वेस्यत दुद्दिष्टं पक्वे तु ऐ व्रणवत्क्रिया ॥ ३ ॥ द्विपंचमूली त्रिफलाकुलत्थं त्रि
वृद्धवेर्मूलकशिग्रुयुक्तैः ॥ तैलं तिलैरुज्जमतदेभिः सिद्धं हितं विद्रधिगुल्ममूले ॥ ४ ॥ मेथी अन्ना
लियुग ४ राइग २ सर्षपग २ शोआपा ॥ कुष्ठग २ करंजबीजग २ सैंधवग २ देवदारग २ हलद्रग २ चिडग
मूगलुग २ गुलग २ शिग्रुवरूणश्रीषंडचूरसग ७ एरंडीमाष १ जवघाटपा २ कुंआरग २ बाबरी
ग २ चीकणुं कूरीरोडुकूरी बुल्लेपः विद्रधिनाशः ॥ ॥ इति वृंदे विद्रधिचिकित्सेचतुश्चत्वारिंशो

॥९७॥

ध्यायः॥ ॥अथव्रणचिकित्सितंव्याख्यास्यामः॥ ॥आद्योविम्लापनंकुर्याद्द्वितीयमवसेचनं॥तृ
तीयमुपनाहंचचतुर्थींपाटनक्रिया॥५॥पंचमंशोधनंकुर्यात्षष्ठंरोपणमिष्यते॥६॥एतेक्रमाद्व्रण
स्योक्ताःसप्तमंवैकृतापहं॥६॥मातुलुंगाग्निमंथौचसुरदारुमहौषधं॥अहिंस्राचैवरास्नाचप्र
लेपोवातशोफहा॥७॥शिरीषोन्मत्तवाकुचीहिंस्राकालासुदर्शनः॥तंदुलीयकमूलंचप्रलेपःशो
फनाशनः॥८॥दूर्वाद्वयंबलामूलंमधुकंचंदनंतथा॥शीतलाःस्वगुणाःसर्वेप्रलेपःपित्तशोफहा
॥९॥न्यग्रोधोदुंबराश्वत्थप्लक्षवेतसवल्कलैः॥ससर्पिष्कःप्रलेपःस्याच्छोथनिर्वापणःपरः॥१०॥
अंगंतुजेरक्तजेथलेपोयंभिषजांमतः॥विधिर्विषघ्नोविषजेपित्तघ्नोनिहितेविधिः॥११॥पुनर्नव
दारुशिग्रुदशमूलमहौषधं॥कफवातकृतेशोफेलेपःकोष्णोविधीयते॥१२॥सतिलाःसातसी
बीजदध्यम्लाःसक्तुपिंडिकाः॥किण्वकुष्ठलवणाःशस्ताःस्युरुपनाहने॥१३॥सनाशिग्रुमूलकफ
लान्यतसीतिलसर्षपाः॥सक्तवःकिण्वमुष्णानिद्रव्याण्यपिपाचनं॥१४॥तैलेनसर्पिषावापिद्वा
भ्यांवासक्तुपिंडिका॥सुखोष्णःशोफपाकार्थमुपनाहःप्रशस्यते॥१५॥द्रव्याणांपिच्छलानांचत्वग्मू

॥९८॥

लानि प्रपीडनं॥ यवगोधूममाषाणां चूर्णानि च समासतः॥ त्रिवृता बिल्वाग्निकोदंती चित्रको हयमारकः
॥ कपोतकंकगृध्राणां पुरीषाणि च दारुणं॥१७॥ क्षारद्रव्याणि वा यानि क्षारो वा दारणं परं॥ त्रिफला
खदिरो दार्वी न्यग्रोधादिबलाः कुशाः॥१८॥ निंबकुलस्थपत्राणि कषायः शोधनो हितः॥ तिलकल्कः सैंध
वो हरिद्रे त्रिवृद्घृतं॥१९॥ मधुयुक्तं निंबपत्राणि लेपः स्याद्व्रणशोधनः॥ तिलसैंधवयष्ट्याह्व निंबपत्र
निशायुतैः॥२०॥ दंत्यन्मधुयुतैः पिष्टैः प्रलेपो व्रणशोधनः॥ निंबपत्रतिलैः कल्को मधुना कृतशो
धनं॥२१॥ सेचनः रोपणः सर्पिः षायुक्तो यवकल्कप्ययं विधिः॥ वसुकार्जुनविक्रांता मुस्तलोध्र
निशायुगैः॥२२॥ तिलबर्हिशिखारिष्टैर्लेपो दुष्टव्रणापहः॥ करंजारिष्टनिर्गुंडिरसो हन्यात् व्रणकृमी
न्॥२३॥ कल्पपविकलयपत्रकोशाम्राश्चिच्च पूरणं॥ सुरसादिरसैः सेकौ पनं लसुनेन वा॥२४॥ निंब
शम्याकजातसर्कैः सप्तपर्णाश्च मारकैः॥ कृमिघ्ना मतसंयुक्ताः सेकालेपन धावनैः॥२५॥ निंबपत्रं वचा हिं
गुसर्पिर्लवणसर्षपैः॥ धूपनं कृमिरक्षोघ्नं व्रणकंडूरुजापहं॥ न्यग्रोधोदुंबराश्वत्थकदंबप्लक्षवे
तसाः॥ करवीरार्ककुटजाः कषाया रोपणे हिताः॥२७॥ धातुकीचंदनबलासमंगामधुकोत्सलैः॥ दा

